7-7 Scanned

॥ श्रीः ॥

श्रीत्रिपुरसुन्दरीपूजारत्नम्

(श्रीविद्यासपर्यापूजाकौलिकोपचारसहिता)

सम्पादक

स्वामी सदानन्द जी महाराज

प्रथम संस्करण]

[मूल्य ८-००

समर्पणम्

परमाराध्यजगद्वन्धपरिव्राजकसम्राट-
यतिचक्रचूड़ामणिश्रीस्वामीपादाःगुरुवर्य्याः
श्रीकरपात्रपादातांचरणेषुलघुभावपुष्पाञ्जलिः

मातर्भवानि तव पादरजो भवानि,
मातर्भवानि तवदासतरो भवानि।
मातर्भवानि न भवानिपुनर्भवेऽस्मिन्,
त्वद्याक् भवान्यऽनु दिनं न पुनर्भवानि ॥ १ ॥

या विद्या शिवकेशवादि जननी या वै जगन्मोहिनी,
या ब्रह्मादि पिपीलिकान्त जगदानन्दैक सन्दायिनी।
या पंच प्रणव द्विरेकनलिनी याचित्कलामालिनी,
सा पायात्पर देवता भगवती श्रीराजराजेश्वरी ॥ २ ॥

7-7. Scanned

॥ श्रीः ॥

श्रीत्रिपुरसुन्दरीपूजारत्नम्

(श्रीविद्यासपर्यापूजाकौलिकोपचारसहिता)

सम्पादक

स्वामी सदानन्द जी महाराज

[प्रथम संस्करण [मूल्य ८-००

प्रकाशक :
स्वामी सदानन्द जी महाराज
'विद्यानिलयम्', बी० २७/२८ ए-१
दुर्गाकुण्ड, वाराणसी ।

●

प्रथम संस्करण १९८३

●

●

मूल्य : आठ रुपए मात्र

●

मुद्रक :
सन्तोष कुमार उपाध्याय
नया संसार प्रेस
भदैनी, वाराणसी-१

विषय-सूची

* श्रीगणेशाय नमः *

त्रिपुरसुन्दरीपूजारत्नम्

—०—

देव्यामानेक्षुभितगणया पीतगङ्गाजलस्य
व्यालोलाखुप्रचुररदनव्रातसंकृत्तकृत्तेः ।
केकिक्रोधस्खलितफणिनः केसरित्रासितोऽक्ष्याः
शम्भोर्गौरीवलयिततनोश्चेष्टितं नः पुनीतात् ॥१॥

नित्यं नमामि गुरुनाथपदारविन्द-
द्वन्द्वसमुज्ज्वलनखांशुगलन्मरन्दम् ।
यद्दर्शनेन विबुधा अपि मुक्तिभावं
गच्छन्ति तत्र किल कैव कथा नराणाम् ॥२॥

श्रीसामराजनामा सत्यानन्दापराभिधानो यः ।
रचयति समयि प्रीत्यै पूजारत्नं मयूखसंशोभि ॥३॥

पूर्वदिने कृतोपोषणेन शिष्येण संकल्प्य, गणपतिपूजनपूर्वकं स्वस्तिवाचनं विधाय अस्मिन् दीक्षाख्ये कर्मणि आचार्यत्वे वस्त्रपात्रासनहस्तकर्णमात्रादिभिस्त्वामहं वृणे। इति वृतो गुरुर्वृत्तोऽस्मीत्युक्त्वा ब्रह्माणं ऋत्विजं च वरयेत्।

ततः स्ववामे त्रिकोणभूगृहात्मकं मण्डलं विलिख्य, 'ॐ आधारशक्तये नमः' इति सम्पूज्य, फडिति साधारं पात्रं प्रक्षाल्य, तत्र निधाय नम इत्यापूर्य,

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

इति सूर्यमण्डलादङ्कुशमुद्रया तीर्थमावाह्य, 'ॐ' इत्यभ्यर्च्य, धेनुमुद्रां प्रदर्श्य, प्रणवेनाष्टधाऽभिमन्त्र्य, तज्जलेन फडिति द्वारमभ्युक्ष्य पूजयेत्। यथा ऊर्ध्वोदुम्बरे। ॐ विघ्नाय नमः। ॐ महालक्ष्म्यै नमः। ॐ सरस्वत्यै नमः। दक्षिणशाखायाम्–विघ्नाय नमः। वामशाखायाम्– ॐ क्षेत्रपालाय नमः। तयोः पार्श्वे-गङ्गायै०, यमुनायै०। पुनर्दक्षे-धात्रे०। पुनर्वामे–विधात्रे०। पुनर्दक्षे-शङ्खनिधये०। वामे-पद्मनिधये०। देहल्याम्—द्वारदेवताभ्यो नमः। ततो वामाङ्ग सङ्कोचयन् दक्षिणपादपुरःसरमन्तःप्रविश्य। नैरृत्यां वास्तुपुरुषाय०। ब्रह्मणे नमः। मूलेनास्त्रेण च विघ्नानुत्सार्य,

अपसर्पन्तु ते भूता ये भूता दिवि संस्थिताः।
ये चाऽत्र विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥

इति सर्षपान् विकिरेत्। क्रीं आधारशक्तिकमलासनाय०। इत्यासनं सम्पूज्य, मूलेन पञ्चगव्येन मण्डपं प्रोक्ष्य, वक्ष्यमाणविधिना सम्भारान् विधाय गुरुदेवतां च स्मृत्वा, वक्ष्यमाणविधिना भूतशुद्धि विधाय, सामान्यार्घ्यं संस्थाप्य, तज्जलेन सर्वत्र प्रोक्ष्य महासर्वतोभद्रमण्डलं विदध्यात्। यथा—तिर्यगूर्ध्वाः सप्तदशरेखाः कृत्वा षट्पञ्चाशदधिकशतद्वयं कोष्ठानि सम्पद्यन्ते। तत्र मध्ये षट्त्रिंशत्कोष्ठानि सम्मार्ज्य, तत्र त्रीणि वृत्तानि कृत्वा आद्यवृत्तोपरि केसराणि, द्वितीयवृत्तोपरि दलानि, तृतीयवृत्तोपरि वल्लरीः कुर्यात्। तदुपरि कोणे कोष्ठे त्रयत्रयेमं च पादान् कृत्वा शेषकोष्ठैर्गात्राणि कुर्यात्। तदुपरि कोणस्थितैकैक कोष्ठानि संस्थाप्योर्वरितानि प्रोक्ष्य, वीथीद्वयं कुर्यात्। तदुपरि दिक्षु परितश्चत्वारि चत्वारि कोष्ठानि मार्जयेत्। तस्यामेव कोणस्थकोष्ठत्रयं त्रयं संस्थाप्य तदग्रे परितः कोष्ठत्रयं त्रयं मार्जयेत्। तदुपरि दिक्षु षट्षट् कोष्ठानि मार्जयेत्। तस्यामेव कोणस्थकोष्ठत्रयं त्रयं संस्थाप्य तदग्रे परितः कोष्ठद्वयं द्वयं मार्जयेत्। एवं कृते कोणेषु शृङ्खलाः सम्पद्यन्ते। अवशिष्टकोणस्थकोणत्रयेषु मण्डलानि कुर्यात्। इति सर्वतोभद्रम्।

एतान्येव कोष्ठानि यदि लिङ्गकाराणि मार्जयीत तदा 'लिङ्गतो-भद्रं' भवति। यथा—वा चतुःषष्टि कोष्ठानि कृत्वा मध्यस्थ-कोष्ठचतुष्टयं संमार्ज्य पद्मं विधाय कोणस्थितैकैकं त्यक्त्वा चतस्रो वीथीः कुर्यात्। दिक्षु पद्मानि कुर्यात्। विदिक् चतुष्टयेषु च षोडशधा विभिन्नेषु स्वस्तिकाकारं मार्जयेत्। मध्ये च वल्लरीः कुर्यात्। सर्वतोभद्रं भवति।

ॐ मही द्यौः पृथिवी च न ऽइमं यज्ञं मिमिक्षताम्।
पिपृतान्नो भरीमभिः॥

ॐ मण्डलाय नमः, इति सम्पूज्य। तदुपरि 'ग्लौं अन्नं मह्यमन्नं देह्यन्नाधिपतये ममान्नप्राणं दापय स्वाहा ग्लौं।' इति भूमिं स्पृष्ट्वा,

ओषधयः समवदन्त सोमेन सह राज्ञा।
यस्मै कृणोति ब्राह्मणस्तं राजन्पारयामसि॥

ॐ ओषधीभ्यो नमः। इति तण्डुलानोटच तदुपरि दर्भानास्तीर्य, ॐ आधारशक्तये नमः। कूर्माय नमः। मण्डले। यं धूम्रायै०। रं उष्मायै०। लं ज्वलिन्यै०। वं ज्वालिन्यै०। शं विस्फुलिङ्गिन्यै०। षं सुश्रियै०। सं सुरूपायै०। हं कपिलायै०। लं हव्यवाहायै०। क्षं कव्यवाहायै०। इति सम्पूज्य। तत्र धातुमयं कुम्भं फडिति प्रक्षाल्य, ॐ इति धूपयित्वा। आकलशेषु धावति पवित्रे परिषिच्यते। उक्थैर्यज्ञेषु वर्धते। कलशाय नमः, इति संस्थाप्य। त्रिगुणतन्तुनावेष्ट्य। तत्र कं तपिन्यै०। खं तापिन्यै०। गं धूम्रायै०। घं मरीच्यै०। ङं ज्वालिन्यै०। चं रुच्यै०। छं सुषुम्नायै०। जं भोगदायै०। झं विश्वायै०। ञं बोधिन्यै०। टं धारिण्यै०। ठं क्षमायै०। विलोमाऽनुलोममातृकया मूलेन च कषायजलेनापूर्य।

ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रिस्तोमं स च तापरुष्ण्या।
असिक्न्या मरुद्वृधे वितस्तया जिकीये शृणु ह्याशुपो मया॥

अं अमृतायै०। आं मानदायै०। इं पूषायै०। ईं तुष्ट्यै०। उं पुष्ट्यै०। ऊं रत्यै०। ऋं धृत्यै०। ॠं शशिन्यै०। ऌं चन्द्रिकायै०।

ॡं कान्त्यै०। एं ज्योत्स्नायै०। ऐं श्रियै०। ओं प्रीत्यै०। औं अङ्गदायै०। अं पूर्णायै०। अः पूर्णामृतायै०। इति सम्पूज्य। कं सृष्टिकलायै०। खं ऋद्धिकलायै०। गं स्मृतिकलायै०। घं मेधाकलायै०। ङ कान्तिकलायै०। चं लक्ष्मीकलायै०। छं धृतिकलाय०। जं स्थिरकलायै०। झं स्थितिकलायै०। ञं सिद्धिकलायै०। टं राजकलायै०। ठं पालिनीकलायै०। डं शान्तिकलायै०। ढं ईश्वरीकलायै०। णं रतिकलायै०। तं कामिकाकलायै०। थं वरदाकलायै०। दं आह्लादिनीकलायै०। धं प्रीतिकलायै०। नं दीर्घाकलायै०। पं तीक्ष्णाकलायै०। फं रौद्रीकलायै०। बं भयाकलायै०। भं निद्राकलायै०। मं तन्त्राकलायै०। यं क्षुत्कलायै०। रं क्रोधिनीकलायै०। लं क्रियाकलायै०। वं उत्कारिणीकलायै०। शं स्मृतिकलायै०। षं पीताकलायै०। सं श्वेताकलायै०। हं अरुणाकलायै०। क्षं असिताकलायै०। अं प्रतिज्ञाकलायै०। आं प्रतिष्ठाकलायै०। इं विद्याकलायै०। ईं शान्तिकलायै०। उं इन्धिकाकलायै०। ऊं दीपिकाकलायै०। ऋं रेचिकाकलायै०। ॠं मोचिकाकलायै०। ऌं पराकलायै०। ॡं सूक्ष्माकलायै०। एं सूक्ष्मामृताकलायै०। ऐं ज्ञानाकलायै०। ओं ज्ञानामृताकलायै०। औं आप्यायनीकलायै०। अं व्यापिनीकलायै०। अः कामरूपाकलायै०। गन्धेनालोड्य। हंस शुचिष० ॥१॥

प्रतद्विष्णु० ॥ यस्योरुषु० ॥२॥ त्र्यम्बकं यजामहे० ॥३॥ तद्विष्णोः परमं पदं० ॥४॥ तद्विप्रासो० ॥ विष्णुर्योनिं कल्पयतु ॥

गर्भं धेहि सिनीवाली गर्भं धेहि सरस्वती।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ।

इति शङ्खेन क्वाथं कुम्भे निक्षिपेत्।

सहिरत्नानि दाशुषे स वाति सविता भगः। तं भागं चित्रमामहे ॥

इति पञ्चरत्नानि।

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत्किला स थ यत्स नवथ पूरुषम् ॥

इति पञ्चपल्लवान् ।

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनैनु बभ्रूणामहं शतं धामानि सप्त च ॥

इति सर्वौषधीः ।

याः फलिनीः० ॥ इति सफलं चषकं स्थापयेत् ।

एवमेव दिगष्टकेऽष्टौ कुम्भान् स्थापयेत् । मध्यकुम्भे देवतामावाह्य पूजयेत् । कुम्भाष्टकेषु इन्द्र १, अग्नि २, यम ३, निर्ऋति ४, वरुण ५, वायु ६, कुवेर ७, ईशान ८—इति इन्द्रादीन् शक्तावन्यांश्चतुरो विदिक्षु कुम्भान् संस्थाप्य । भैरव-योगिनी-क्षेत्रपाल-गणेशान् पूजयेत् ।

ततो मन्त्रशोधनचक्राणि विलिख्य, उपचारैरभ्यर्च्य मन्त्रं शोधयेत् । सर्वाभावे सिद्धारि ऋणधने शोधयेत् । तानि चक्राणि यथा—अ आ रा क च ट त प य षाः मारुताः । इ ई ऐ ख छ ठ थ फ रक्षाः तैजसाः । उ ऊ ओ ग ज ड द ब लशाः पार्थिवाः । ऋ ॠ औ घ झ ढ ध भ व सा वारुणाः । ऌ ॡ अं ङ ञ ण न म अः हाः नाभसाः । तत्र भौमवारुणयोर्मैत्र्यम् । आग्नेयमारुतयोर्मैत्र्यम् । मारुत-पार्थिवयोराग्नेयवारुणयोराग्नेयपार्थिवयोर्वैरम् । नाभसं सर्वमित्रम् । साध्यसाधकयोराद्याक्षरस्यैकत्वे स्वकुलम् । इति भूतविचारः ।

पूर्वोत्तरायत्तरेखाद्वयं द्वयं विलिख्य कोणेषु रेखाचतुष्टयं लिखेत् । द्वादशार चक्रं सम्पद्यते । तत्र अरान्तरलेषु मेषादीन् राशीन् लिखेत् । तदक्षराणि च । अ आ इ ई मेषः । उ ऊ ऋ ॠ वृषः । ऌ ॡ मिथुनः । ए ऐ कर्कः । ओ औ सिंहः । अं अः शषसहलक्षाः कन्या । कर्कास्तुलः । चवर्गो वृश्चिकः । टवर्गो धनुः । तवर्गो मकरः । पवर्गो कुम्भः ।

यवर्गो मीनः। साधकनामाद्याक्षरारान्तारालादामन्त्राद्याक्षरारान्तं गणयेत्—तत्र। प्रथमपञ्चमनवमाबन्धवाः। द्विषट्दशमाः सेवकाः। त्र्येकादशसप्तमीः पोषकाः। द्वादशाष्टचतुर्थ्याः घातकाः। एते च लग्न-धन-भ्रातृ-बन्धु-पुत्र-शत्रु-कलत्र-मरण-धर्म-कर्माय-व्ययाख्या राशयः। वैष्णवे तु वन्धुस्थाने शत्रुं, शत्रुस्थाने बन्धुं जानीयात्। इति राशिचक्रम्।

अ आ अश्विनी देवगणः। इ ई भरणी मनुष्यगणः। उ ऊ कृतिका राक्षसगणः। ऋ ॠ ऌ ॡ रोहिणी मनुष्यगणः। ए मृग देव०। ऐ आर्द्रा मनुष्य०। ओ औ पुनर्वसु देव०। क पुष्य देव०। ख ग अश्लेषा राक्षस०। घ ङ मघा राक्षस०। च पूर्वा मनुष्यगण०। छ ज उत्तरा मनुष्य०। झ ञ हस्त देव०। ट ठ चित्रा राक्षसग०। ड स्वाती देव०। ढ ण विशाखा राक्षस०। त थ द अनुराधा देव०। ध ज्येष्ठा राक्षस०। न प फ मूल राक्षस०। ब पूर्वाषाढा मनुष्य०। भ उत्तराषाढा मनुष्य०। म श्रवण देव०। य र धनिष्ठा राक्षस०। लशत तारका राक्षस०। वश पूर्वाभाद्रपदा मनुष्य०। षसह उत्तराभाद्रपदा मनुष्य०। अं अः लक्ष रेवती देव०। साधकनक्षत्रादिसाध्यनक्षत्रान्तं गणयित्वा नवभिर्भक्त्वा शेषाङ्कं विलोकयेत्। त्रिपञ्चसप्तशेषं न शुभम्। तदतिरिक्तशेषं शुभम्। इति नक्षत्रचक्रम्।

एतेष्वेव एकगणयोः प्रीतिः। देवमानुषयोर्मध्यमा प्रीतिः। साधक-साध्ययोः क्रमेण देवमानुषत्वे वश्यमेव। रक्षोमानुषयोर्नाशः। तत्रापि साधक-साध्ययोः क्रमेण रक्षोमानुषत्वे युक्तमेव वोध्यम्। देवराक्षसयोर्वैरम्। इति गणचक्रम्।

षोडशकोष्ठानि विलिख्य आद्ये तृतीये एकादशे नवमे द्वितीये चतुर्थे द्वादशे दशमे षष्ठे अष्टमे षोडशे चतुर्दशे पञ्चमे सप्तमे पञ्चदशे त्रयोदशे एवं क्रमेण आदिक्षान्तान् वर्णान् विलिखेत्। तत्र चत्वारि चतुष्काणि सिद्ध-साध्य-सुसिद्ध-वैर्यभिधानि भवन्ति। तेष्वपि कोष्ठानि तथैव ज्ञेयानि। साधकाक्षराद् गणयेत्। तत्फलं च तन्त्रराजे—

सिद्धसिद्धो जपात् सिद्धयेत् द्विगुणात् सिद्धसाध्यकः ।
सिद्धसुसिद्धः सम्प्राप्याऽसिद्धारिं हन्ति गोत्रजान् ॥
साध्यसिद्धोऽतिसंक्लेशात् साध्यसाध्योऽतिदुःखकृत् ।
साध्यः सुसिद्धो भजना साध्यारिः स्वां स्त्रियं हनेत् ॥
सुसिद्धसिद्धोऽध्ययनात् फलं दद्याद्यथेप्सितम् ।
सुसिद्धं साध्यो जपाद्यैः सिद्धये स्यादितोऽन्यथा ॥
सुसिद्धे तु सुसिद्धस्तु पूर्वजन्मकृतश्रमः ।
सुसिद्धारिरशेषेण स्वकुलान्नाशयेद् ध्रुवम् ।
अरिसिद्धः सुतं हन्यादरिसाध्यः स्वयोषितम् ॥
अरिः सुसिद्धो मन्त्रस्तत्कुलोत्सादनकृत् शनैः ।
अर्यरिः स्वात्महा मन्त्रः सम्प्राप्त्यैव सुनिश्चितम् ॥

इति सिद्धारिचक्रम् ।

एकादशैकादशकोष्ठशालिनीश्चतस्रः पङ्क्तीः कृत्वा आद्येषु पञ्चसु कोष्ठेषु द्वि-द्विक्रमेण दशस्वरान् विलिख्य शेषेष्वेकैकं वर्णं लिखेत् । षट्६-षट्६ शून्य० त्रि३ चतु४ श्चतु४ श्शून्यत्रय०००त्रयः ३ त्रीन्३ साध्यकानुपरि लिखेत् । अधश्च द्वि २ द्वि २ पञ्च ५ शून्यद्वय०० द्वि २ एक १ शून्य० चतु४ श्चतु ४ रेक १ आख्यान्साधकान् लिखेत् । स्वर-व्यञ्जनभेदेन स्वनामाङ्ककूटमन्त्राङ्ककूटं च पृथक् कुर्यात् । ततश्च अष्टभिर्भक्तोर्वरितं गणयेत् । अधिको ऋणी न्यूनो धनी ज्ञेयः । तन्त्रराजे तु प्रकारान्तरेण ऋणधनशोधः । मातृकायां साधकनामाक्षरमारभ्य मन्त्राद्यक्षरपर्यन्तं गणनया संख्या सम्पद्यते । तां त्रिगुणितां विधाय सप्तभिर्भक्त्वा शेषमङ्कं पृथङ् निदध्यात् । अथ मन्त्राद्यक्षरमारभ्य साधकनामाद्यक्षरान्तं गणनया संख्या सम्पद्यते, तां सप्तगुणितां कृत्वा त्रिभिर्भक्त्वा शेषमङ्कं पृथङ निदध्यात् । पूर्वः साध्याङ्कः उत्तरः साधकाङ्कः, तयोरधिको ऋणी, न्यूनो धनी

भवति । तत्र स्वस्य ऋणीमन्त्रः शुभो ज्ञेयः । ऋणी चेन्मन्त्र उत्तम इति वचनात् । इति ऋणधनम् ।

राशिचक्रवच्चक्रं विलिख्य, तत्र नपुंसकवर्जितान्यक्षराणि क्रमेणावृत्तिचतुष्टयेन लिखेत् । सिद्धारिवत् शोधयेत् । इत्यकडमचक्रम् ।

इत्थं मन्त्रं संशोध्य उपदेश्यमानीय तदक्षिणी वस्त्रेणाच्छाद्य तदञ्जलिपुष्पैरापूर्य स्वयं मन्त्रमुच्चरन् कलशे पुष्पाञ्जलिं क्षेपयेत् । ततो नेत्रमुद्याद्यदर्भासने उपवेश्य देहे वक्ष्यमाणविधिना भूतशुद्ध्यादि-मातृकान्यासान्तं विधाय उपदेश्य देवतामन्त्रन्यासान् कुर्यात् । ततः कुम्भे देवीं सम्पूज्य शिष्यमन्यस्मिन्नासने उपवेश्य शिष्यदेवतयोरैक्यं विचिन्त्य तं चन्दनेनाऽभ्यर्च्य । ॐ सहस्रार हुँ फट् । इति तस्य शिखां बद्ध्वा तद्देहे कलान्यासं कुर्यात् । यथा—निवृत्यै० । पादादि-जान्वन्तम् । प्रतिष्ठायै० । जान्वादि-नाभ्यन्तम् । विद्यायै० । नाभेराकण्ठम् । शान्त्यै न० कण्ठादाललाटम् । शान्त्यतीतायै० ललाटादाब्रह्मरन्ध्रान्तम् । इति न्यस्त्वा । विलोमेनापि न्यसेत् । ततः शिष्यशिरसि हस्तं निधाय दास्यमानं मन्त्रमष्टोत्तरशतवारं जप्त्वा अमुकमन्त्रं ते ददामीति तद्धस्ते जलं दत्वा दक्षिणकर्णे ऋष्यादिपूर्वकं मन्त्रं निर्वदेत् । ततस्तद्धस्ते पुनस्त्रिर्जलं दत्वा आवयोस्तुल्यफलदोऽस्तु, इति त्रिः प्राशयेत् । ततः शिष्यः साष्टाङ्गं प्रणमेत् । ततो गुरुः—'उत्तिष्ठ वत्स ! मुक्तोऽसि सम्यगाचारवान् भव ।' इति उत्थापयेत् ।

ततः शिष्यो गुरवे सर्वस्वं वा तदर्धं वा तदर्धं वा निवेदयेत् । 'वित्तशाठ्यं न कुर्वीत कृते निष्फलतामियात् ।' ततो गुरुः कुण्डे स्थण्डिले वा दत्तमन्त्रेणैव अयुतं सहस्रमष्टोत्तरशतं वा जुहुयात् । ततः पूजानवकं त्रिकं वा सङ्कल्प्य दिनत्रयं देवीं सम्पूज्याऽन्ते कुम्भमुदवास्य तैरेव पल्लवैर्मूलेन तमभिषिञ्चेदिति संक्षेपेण दीक्षाविधिः ।

मतिशाणोल्लीढरूपे सत्यानन्देन धीमता ।
पूजारत्ने मयूखोऽयं प्रथमः स्फुटतां गतः ॥

इति पूजारत्ने प्रथमो मयूखः ॥१॥

गुरुकृपावशतः पदमद्भुतं
यदभिषिक्ततनुः प्रतिपद्यते ।
निखिलमन्त्रगणाधिपतीनहं
हृदि भजामि सदैव सशाम्भवान् ॥

अथाऽभिषेकदीक्षाविधिः

तत्र प्रथमं दीक्षाकालः। चैत्रे पुरुषार्थसिद्धिः । वैशाखाऽऽशिवनयोर्द्रव्यम् । ज्येष्ठे मृतिः । आषाढे बन्धुनाशः । श्रावणफाल्गुनयोर्मनोरथप्राप्तिः । भाद्रे प्रजानाशः । कार्तिकमार्गशीर्षयोर्मन्त्रसिद्धिः । पौषे शत्रुपीडा । माघे वृद्धिः । इति मासफलम् ।

रवौ वित्तम् । सोमे शमः। भौमे आयुर्हानिः । बुधे सौन्दर्यम् । गुरौ ज्ञानम । शुक्रे शोभा । शनौ दुर्यशः । इति वारफलम् ।

प्रतिपदि ज्ञाननाशः। द्वितीयातृतीययोः शुद्धिः। चतुर्थ्यां वित्तनाशः। पञ्चम्यां बुद्धिः। षष्ठ्यां ज्ञाननाशः। सप्तम्यां सौख्यम् । अष्टम्यां बुद्धिनाशः। नवम्यां मृतिः। दशम्यां राज्यम् । एकादश्यां शुद्धिः। द्वादश्यां सर्वसिद्धिः। त्रयोदश्यां दारिद्र्यम् । चतुर्दश्यां तिर्यग्योनिः । अमायां हानिः । पूर्णिमायां राज्यम् । इति तिथिफलम् ।

अश्विन्यां सुखम् । भरण्यां मृतिः । कृत्तिकायां दुःखम् । रोहिण्यां वाक् । मृगे सुखम् । आर्द्रायां बन्धुनाशः। पुनर्वसौ धनम । पुष्ये शत्रुनाशः। आश्लेषायां मृतिः। मघायां दुःखम् । पूर्वोत्तरयोः सौन्दर्यम् । हस्ते धनम् । चित्रायां ज्ञानम् । स्वात्यां शत्रुनाशः । विशाखायां सुखम् । अनुराधायां बन्धुनाशः । ज्येष्ठायां पुत्रनाशः । मूलादित्रिके कीर्तिः। श्रवणे दुःखम । धनिष्ठायां दारिद्र्यम् । शतभिषायां बुद्धिः । पूर्वोत्तरयोः सुखम् । रेवत्यां कीर्तिः । इति नक्षत्रफलम् ।

अथ तत्तन्मासेषु तिथिविशेषः

चैत्र-वैशाखे शुक्लत्रयोदशी । ज्येष्ठे शुक्लदशमी । आषाढे शुक्ल-

नवमी। श्रावणे कृष्णपञ्चमी। भाद्रे षष्ठी। ईषे कृष्णचतुर्दशी। कार्तिके शुक्लनवमी। मार्गे कृष्णतृतीया। पौषे शुक्लनवमी। माघे शुक्लचतुर्थी। फाल्गुने शुक्लनवमीति।

तत्र पूर्वदिने यथाविधि मण्डपं तदन्तर्वेदिकायां नवपञ्च चाराकं वा कुण्डं विदध्यात्। तस्येति कर्तव्यता यथा—तत्र प्रथमं प्राची साधनम्। समभूमौ मुष्टिमितं द्वादशाङ्गुलं शङ्कुं निधाय प्रातरादि-सायमन्तं विलोकयेत्। सायं यत्र शङ्कुच्छाया पतिता भवति तत्सूर्यो-दयस्थानं, तत्र मत्स्यं विधाय तत्पार्श्वयोश्छायोऽर्द्धेन मापयेत्। तावती प्राची भवति। इत्थं प्राचीः प्रसाध्य चतुरस्त्रं नवहस्तं सप्तहस्तं पञ्चहस्तं वा मण्डपं कुर्यात्। तद्वेदिकायाः परितो द्वादशस्तम्भाः। ते च पञ्चहस्तोच्छ्रिताः मध्येऽष्टहस्तोच्छ्रिताश्चत्वारः। तेषां च पञ्चमांशं निखनेत्। मण्डपत्रिभागेन मध्यवेदिः। तोरणे हस्तमितानि शूलानि। तस्य द्वाराणि हस्तचतुष्टयोन्नतानि कलशद्वयद्वयशोभितानि सतोरणानि कुर्यात्, ध्वजांश्च तत्र तत्रारोपयेत्। उपरि सध्वजां चूडां कुर्यात्। एककुण्डपक्षे पञ्चहस्तो मण्डपः कार्यः। कुण्डानि च चतु-रस्राष्टा[2]स्त्रयो[3]नित्र्य[4]स्त्रष[5]डस्रा[6]र्धचन्द्र वृ[7]त्तपद्मपञ्चास्रभेदेन नवधा। तत्र हस्तमितायां भूमौ सार्धहस्तमितकोणसूत्रसूत्रितायां कुण्डं कुर्यात्। चतुरस्रं कुण्डं भवति। हस्तोऽत्र चतुर्विंशत्यंगुलो ग्राह्यः। एतदुत्पत्तिस्तु रामवाजपेय्यां द्रष्टव्या। सम्यक्चतुरस्रे तिर्यक् चतुरस्रं कुर्यात्।

अष्टास्रं कुण्डं भवति। चतुरस्रं क्षेत्रं पञ्चधा विभज्योपरि तान्येकं भागं परित्यज्य, द्वितीयभागं कोणद्वयाग्रतः।

श्रीःपञ्चाशदक्षरसमुद्भववर्गबीजरूपाखिलावयविनीं त्रिपुरां भजामि।
कोदण्डबाणसृणिपाशमहाख्यमुद्रां विद्राविनेन्द्ररिपुसैनिकसर्वगर्वम्॥
मालां मन्त्रं च मुद्रां च गुरोरपि न दर्शयेत्।

इति तन्त्रोक्तवचनात्। दीक्षादिनादित एतत्सर्वं गोपयेत्। तत्र माला त्रिविधा। वर्णमाला करमाला अक्षमाला चेति। अक्षाः= मणयः। तत्र वर्णमालास्वरूपं तन्त्रे—

अकारादि-क्षकारान्तं पञ्चाशल्लिपि - संख्यया ।
अक्षमालेति विख्याता क्रमोत्क्रमगतार्णयेति ॥

क्षकारोऽत्र मेरुभूत इति सम्प्रदायः। करमाला द्विविधा। अनामाद्यपर्वादि-मध्यमाद्यपर्वान्तम् । अनामामध्यपर्वादि-तर्जन्याद्यपर्वान्तं वा गणयेत । अक्षमाल त्वनेकधा । नवरत्नमयी, प्रत्येकरत्नमयी स्फाटिकमयी कमलाक्षमयी पुत्रजीवमयी रुद्राक्षमयी चेति। आद्यया राज्यप्राप्तिः। द्वितीयस्यां मुक्तामयी यशःकीर्तिवाग्विलासमुक्तिप्रदा। पद्मरागमयी बहुसम्पद्प्रदा। वज्रविद्रुममय्यपि तथा। पुष्परागमयी वश्यकरी। गारुत्मन्मण्याकृष्टिदा। नीलमणिजोच्चाटननिधनकृत्। तृतीया विद्याप्रदा। चतुर्थी धनदा। पञ्चमी सन्तानवर्धिनी। षष्ठी सर्वकामप्रदा। सा च माला संस्कृतैवोपयुज्यते। स च संस्कारो यथा—अस्त्रेण सूत्रं प्रक्षाल्य मूलेन तत्र मणिं प्रवेश्य प्रणवेन मेरुं कुर्यात्। ततः सर्वतोभद्रादि विरच्य देवीं सम्पूज्य नवभिरश्वत्थदलैः पद्माकारं कृत्वा तत्र मालां संस्थाप्य पञ्चामृतेनाभिषिच्य मूलेन कुशग्रन्थीन् कृत्वा संधूप्य सम्पूज्य प्रणवेन मातृकया जप्त्वा कुशग्रन्थीनुन्मुच्य गोमुखीमावेश्य। 'ह्रीं मां मालायै नमः' इत्यभिमन्त्र्य, 'संसिद्ध्यै नमः' इति शिरसि धृत्वा मूलं जपेत्। तत अष्टोत्तरशतं सहस्रं वा मूलेन मालामन्त्रेण च हुत्वा संपाताल्यं मालायां दद्यात्। मालासंस्काराङ्गत्वेन देव्या अपि महापूजा कुर्यात्। गुरुं शक्तीः कुमारीश्च सम्पूज्य, यथासुखं विहरेत्।

एवं संस्कृतमालाया कृतो मन्त्रजपः सिद्धिदो भवति। मन्त्राश्च साङ्गोपाङ्गाः कुमार्यादि-शाम्भवान्तास्ते चाऽग्रे वक्ष्यन्ते।

मुद्राश्चावाहन्यादयः। यथाक्रम तल्लक्षणानि। यथा—कराभ्यामञ्जलिं विधाय अनामाद्य पर्वणोरङ्गुष्ठौ न्यसेदिति आवाहनी भवति। इयमेवाधोमुखी स्थापनी भवति। ऊर्ध्वाङ्गुष्ठमुष्टियुगयोगे सन्निधापनी भवति। इयमन्तःस्थितांगुष्ठासन्निरोधिनी भवति। बहिष्कृततिर्यगङ्गुष्ठयासम्बद्धमुष्टियुगा सन्मुखीकरणी भवति। देव्यङ्गे षडङ्गन्यासः

सकलीकरणी । अङ्गमुद्राश्च ज्ञानार्णवे—'त्रिद्वयैकं दशकं त्रिद्विसंख्यया-शैलसम्भवे ।'

तर्जन्यनामाङ्गुष्ठयोगेन हृदयमुद्रा । मध्यमानामाभ्यां शिरोमुद्रा । अङ्गुष्ठमात्रावनमनेन शिखामुद्रा । पश्चापश्चाङ्गुलीनां व्यत्ययेन स्कन्धसंस्पर्शो हि कवचमुद्रा । तर्जनीमध्यमानामाभिर्नेत्रमुद्रा । तर्जनी-मध्यमानामाभ्यामस्त्रमुद्रेति केचित् ।

वस्तुतस्तु—तर्जनीमध्यमानामायोगेन हृदयमुद्रा । अङ्गुष्ठतर्जनी-योगेन शिरोमुद्रा । सैव चास्त्रप्रयोजिता अस्त्रमुद्रा भवति । वैष्णवे तु तलेन मुष्टिभ्यां मुष्टिना स्कन्धादि-नाभ्यन्तमवतारणेन । तर्जन्यनामा-भ्याम् । तन्नाभ्यां च षडङ्गानि भवन्ति । एवमेव सौरेऽपि । शैवे तु पञ्चाङ्गुलीभिः । अङ्गुष्ठेन मध्यमानामाभ्याम् । अङ्गुलीदशकेन अङ्गुष्ठतर्जनीमध्यमाभिः तलाभ्यां च षडङ्गानि । गाणपत्येऽप्येवम् । संलग्नाभ्यामर्द्धचन्द्राकृतितर्जनीभ्यां मुष्टिभ्यामवगुण्ठनम् । दीर्घाधो-मुखतर्जनीकसव्यमुष्टिनाऽवगुण्ठनीति केचित् ।

मिथो मध्यमयोस्तर्जन्योस्तथाऽनामिकयोः कनिष्ठकयोश्च योगात् सुरभिमुद्रा भवति । अन्योन्यमङ्गुष्ठौ संग्रथ्याङ्गुलीः प्रसारयेत् परमीकरणी भवति । दक्षिणकनिष्ठिकानामिकामध्यमाभिर्वामाङ्गुष्ठं धृत्वा सर्वाः संयोजयेत् शङ्खमुद्रा भवति । सन्मुखप्रसारितयोः करयो-र्मिथः कनिष्ठाङ्गुष्ठयोगेन चक्रमुद्रा भवति । अन्योन्यग्रथिताङ्गुल्योः करयोर्मिलिताच्छिन्नाङ्गुष्ठामिलितसरलमध्यमध्यमा गदामुद्रा भवति । मिलितकरतलान्तर्ग्रथिताङ्गुष्ठोर्ध्वसर्वाङ्गुलिर्लग्नतर्जनीकनिष्ठा युगा-मुद्रा भवति । ओष्ठलग्नवामाङ्गुष्ठावामकनिष्ठासंलग्न-दक्षिणांगुष्ठा-प्रसारितदक्षिणकनिष्ठिकाचालितोभयकरतर्जनीमध्यमानामा वेणुमुद्रा भवति । उत्तानाधोमुखौ करौ संयोज्य मिथोऽङ्गुष्ठाभ्यां मध्यमानामि-काङ्गुल्यौ धृत्वा कनिष्ठमूलयोस्तर्जन्यौ स्थापयेत् श्रीवत्समुद्रा भवति । तर्जनीभ्यां कण्ठादिपादान्तं नयेत् वनमालामुद्रा भवति । विमुखौ करौ कृत्वा कनिष्ठतर्जन्यावगुण्ठौ च मिथः संग्रथ्य उभयतो मध्यमानामिके

चालयेत् गरुडमुद्रा भवति। जानुमध्यान्तर्गतभूमिष्ठकरयुगो विवृत-मुखान्तर्ललज्जिह्वो भवेत् नारसिंहीमुद्रा भवति। वाममध्यमानामिके दक्षतर्जन्यां धृत्वा मध्यमानामिकोर्ध्वस्थदक्षकनिष्ठिकां वामकनिष्ठिकया धृत्वा वामतर्जनीसहिताः दक्षाऽङ्गुष्ठमध्यमानामाः उच्चाः (उच्चैः) कृत्वा वामाङ्गुष्ठं दक्षमणिबन्धे योजयेत् कौस्तुभमुद्रा भवति। युक्ताङ्गुष्ठतर्जन्योर्हृदिन्यासो ज्ञानमुद्रा भवति। इमां कृत्वा वामजानुनि वामकरस्थापने वीरज्ञानमुद्रा भवति। दक्षाङ्गुष्ठं वामांगुष्ठेन संग्रथ्य दक्षांगुलीभिरावेष्ट्य वामांगुलीभिः पुनरावेष्टयेत् विन्दुमुद्रा भवति। दक्षांगुलीनामुपरि वामांगुलीः संस्थाप्य भुग्नाः कुर्यात्। हयग्रीवमुद्रा भवति। वाममध्यमानामाग्रे तत्तर्जनीकनिष्ठ-कयोर्योजयेत् धनुर्मुद्रा भवति। सरलादक्षतर्जनी बाणमुद्रा भवति। वाममुष्टिश्चापः। ऋज्वंगुष्ठमिलितं मुष्टियुगं त्रैलोक्यमोहनमुद्रा भवति। वामतजन्यंगुष्ठकुण्डलिकायां दक्षाङ्गुष्ठं प्रवेशयेत् लिङ्गमुद्रा भवति। मिथोंऽगुलीः संग्रथ्य तर्जनीभ्यामनामिके संगृह्य कनिष्ठिके संग्रथ्य युक्तोर्ध्वमध्यमयोरंगुष्ठौ योजयेत् योनिमुद्रा भवति। इयमेवान्तः-प्रविष्टकनिष्ठिकापि योनिमुद्रा।

मिथो मिलिताङ्गुली करौ कृत्वा वामतर्जन्या दक्षकनिष्ठिकां संगृह्य दक्षतर्जन्या वामानामां गृहीत्वा युक्तोर्ध्वमध्यमयोरन्तर्दक्षानासां प्रवेश्य तत्राङ्गुष्ठौ निवेशयेत् अन्या योनिमुद्रा भवति। कनिष्ठाङ्गुष्ठौ सम्मे-ल्यान्याः सरलयेत् त्रिशूलमुद्रा भवति। अङ्गुष्ठतर्जन्यग्रे संयोज्य शिष्टाः प्रसारयेत् मालामुद्रा भवति। प्रसृताधोमुखो दक्षकरो वरमुद्रा भवति। प्रसृतोर्ध्वीकृतो वामकरोऽभयमुद्रा भवति। मध्यमानामाभ्या-मङ्गुष्ठं संयोज्य तर्जनी-कनिष्ठिके; ऊर्ध्वे कुर्यान्मृगीमुद्रा भवति। सान्तरो मुष्टिः खट्वाङ्गमुद्रा भवति। पात्राकारो वामहस्तः कपाल-मुद्रा भवति। सरलाङ्गुष्ठतर्जनीको बद्धमुष्टिर्वाणमुद्रा भवति। वामां-गुष्ठतर्जनीमध्यमानामासु दक्षतर्जनीमध्यमानामाकनिष्ठिकाः स्थाप-येत् वाणमुद्रा भवति। कुञ्चितमध्यमः शिथिलमुष्टिर्डमरूमुद्रा। यद्वा तर्जन्यनामे संयोज्य मध्यमामूर्ध्वां कुर्यात् डमरूमुद्रा भवति। मुष्ट्यौ-

स्तर्जन्यौ मिथो मध्यपर्वणि संयोज्य अंगुष्ठौ तर्जन्यग्रे योजयेत् पाशमुद्रा भवति। दक्षमुष्टिमध्यमां सरलां विधाय तल्लग्नां तर्जनीं मध्यपर्वणि नामयेत् अङ्कुशमुद्रा भवति। वामतर्जनी मध्यमानामामूलेषु दक्ष-तर्जनीमध्यमे स्थापयेत् परशुमुद्रा भवति। लड्डुकाकारः करोल्लड्डुकः। सान्तरःसम्पुटो बीजपूरः। वामहस्तं तिर्यक्कृत्वा मुष्टिं कुर्यात् चर्ममुद्रा भवति। वाममुष्टेरुपरि दक्षमुष्टिं स्थापयेत् मुसलमुद्रा भवति। तिर्य-गंगुष्ठा ऊर्ध्वकनिष्ठिकौ प्रसृततर्जनी मध्यमानामौ सान्तरौ करौ वामभागे नियोजयेत्। वीणामुद्रा भवति। उत्तानोर्ध्वसरलसाभुग्नांगुष्ठ-तर्जनीमध्यमानामानामितकनिष्ठिका दन्तमुद्रा भवति। भुग्नतर्जनिका-मध्यमानामिकान्तर्गतांगुष्ठाधःसरलमध्यमा गजतुण्डमुद्रा भवति। मिलिताधोमुखपञ्चांगुलीभिर्विघ्नमुद्रा भवति। कनिष्ठांगुष्ठौ कनिष्ठा-नामांगुष्ठान् वा संयोज्य सर्वाश्चोर्ध्वाः प्रसारयेत् खड्गमुद्रा भवति। मुसलमुद्रया शिरसि सिञ्चेत् दुर्गामुद्रा भवति। प्रसृतो दक्षहस्तः पुस्तक-मुद्रा। पुस्तकमुद्रां कृत्वा तत्सम्मुखं दक्षिणांगुष्ठतर्जन्यौ सम्मेल्य अन्याः सरलाः कुर्यात् व्याख्यानमुद्रा भवति। मिथो मिलितमणिबन्धौ प्रसृताङ्गुलीकौ अन्तर्मिलितांगुष्ठकनिष्ठिकौ करौ कुर्यात् सप्तजिह्वामुद्रा भवति। विवृताङ्गुलौ वामकरे उत्ताने तथैव दक्षिणं संस्थाप्य कनि-ष्ठिकाग्रयोरङ्गुष्ठौ योजयेत् गालिनीमुदा भवति। युक्तावंगुष्ठावन्तर्धृत्वा कराभ्यां सावकाशं मुष्टिं कुर्यात् कुम्भमुद्रा भवति। प्रसृतं श्लिष्टं करद्वयं हृदि स्थापयेत् प्रार्थनामुद्रा भवति। अञ्जलिरेवाञ्जलिमुद्रा।

उन्नताङ्गुष्ठौ मुष्टीसन्मुखाङ्गुष्ठौ मेलयेत् कालकर्णिकामुद्रा भवति। नासिकार्पिततर्जनीको मुष्टिर्विस्मयमुद्रा। ऊर्ध्वाङ्गुष्ठो मुष्ठिर्नादमुद्रा। स्वाग्रस्थिततर्जन्यंगुष्ठयोगो विन्दुमुद्रा। अधोमुखवामकरोपरि ऊर्ध्व-मुखं दक्षकरं संस्थाप्य अन्योन्यमङ्गुलीः सम्पीड्य परिवर्त्य तर्जन्या ऊर्ध्वे योजयेदुपसंहारमुद्रा भवति। दक्षपाणिपृष्ठस्थितवामपाणि-र्विपरीता वा चालिताङ्गुलिर्मत्स्यमुद्रा भवति। वामतर्जन्या दक्ष-कनिष्ठां संयोज्य वामाङ्गुष्ठेन दक्षतर्जनीं संयोज्य वामपितृतीर्थे

दक्षमध्यमानामे लम्बयेत् कूर्ममुद्रा भवति। न्युब्जवामकरे न्युब्जं दक्षकरं संस्थाप्य द्वयोरपि मध्यमानामे लम्बयेत् अङ्गुष्ठौ चोर्ध्वौ विदध्यात् वाराहीमुद्रा भवति। द्वयोः करतलयोर्योगः सम्पुटमुद्रा। सैव किञ्चिद् विवृता सिंहाक्रान्तम्। सैवातिविवृता महाक्रान्तं भवति। बद्धमुष्टिकः प्रसृतो हस्तो मुद्गरः। श्रीवत्स एव यमपाश इत्युच्यते। न्युब्जवामकरतलोपरि तथैव दक्षिणं संस्थाप्य तत्तदङ्गुष्ठतर्जन्यौ चक्राकारेण योजयेत् शकटमुद्रा भवति। कनिष्ठिकाङ्गुष्ठौ संयोज्य तर्जनीमध्यमानामा लम्बयेत्। लिलिहानामुद्रा भवति। मध्यमास्थ-तर्जन्यनामिकायुक्ताङ्गुष्ठकनिष्ठिकाग्रा योगिनीमुद्रा भवति। सैव महायोनिरित्युच्यते। केवलतर्जनी भैरवी। केवलाऽनामिका क्षेत्रपाली। वाममुष्टि सरलतर्जनीकं वामकर्णे भ्रामयेत् सौभाग्य-दण्डिनीमुद्रा भवति। अन्तर्गतांगुष्ठवाममुष्टी रिपुजिह्वा मुद्रा भवति। योनिमुद्रां बध्वा कनिष्ठिके विदार्य मध्येंऽगुष्ठौ निवेशयेत्, भूतिनीमुद्रा भवति।

अथ संक्षोभिण्याद्यास्तासां लक्षणानि तन्त्रराजे। यथा—

कनिष्ठानामिकामध्या नखैरन्योन्यसङ्गताः।
कृत्वाऽङ्गुष्ठौ कनिष्ठास्थौ ऋजू कुर्याच्च तर्जनी॥
सर्वसंक्षोभिणीमुद्रा त्रैयोक्यक्षोभकारिणी।
एतस्या मध्यमे देवि तर्जनीवत्कृते सति॥
सर्वविद्राविणी मुद्रा सर्वासामपि योषिताम्।
ताभ्यामङ्कुशरूपाभ्यां संश्लिष्टाकर्षिणी मता॥
परिवृत्ताङ्गुली कृत्वा नखाश्लिष्टतरौ करौ।
अङ्गुष्ठौ तर्जनीश्लिष्टौ नखैरावेशकारिणी॥
कराग्रे प्रसृते कृत्वा व्यत्यस्येतत्कनिष्ठिके।
तदाग्राश्लेषतो भुग्ने मध्यमेऽनामिके ऋजू॥

तन्नखस्थे तु तर्जन्यावङ्गुष्ठौ मध्यमोपरि ।
इयमुन्मादिनीमुद्रा सर्वात्मानन्दकारिणी ॥
अस्यास्त्वनामिके भुग्ने तर्जन्यावङ्कुशाकृती ।
एषा महाङ्कुशा मुद्रा स्तम्भनाकर्षकारिणी ॥
सव्यदक्षौ करौ सम्यक् व्यत्यस्येत्कूर्परोपरि ।
ततः मणिबन्धानि बध्नीयादञ्जलिं मध्यपृष्ठयोः ॥
विधाय भुग्ने तर्जन्यौ अंगुष्ठौ कारयेद् ऋजू ।
कनिष्ठाऽनामिके कुर्याद् व्यस्ते करपृष्ठगे ॥
इयं सा खेचरी मुद्रा ललिताप्रीतिकारिणी ।

ज्ञानार्णवे तु—कनिष्ठानामिकायुग्मं तर्जनीभ्यां निरुन्धयेत् ॥
मध्यमे सरले योज्य योनिवत्सरलौ ततः ।

अङ्गुष्ठौ खेचरीमुद्रेति विशेषः । अन्यत्सर्वं पूर्ववत् ।

मध्यमामध्यपार्श्वाधः कनिष्ठाग्रे विपर्ययात् ।
अनामिकेऽधो व्यत्यस्ते तर्जन्यावङ्कुशाकृतिम् ॥
इतरे तन्नखाग्राग्रे बीजमुद्रेयमीरिता ।
कनिष्ठाङ्गुष्ठसंश्लेपान् महायोनिस्त्रिखण्डिका ॥

या त्रिखण्डा सा महायोनिरित्यर्थः ।

कृताञ्जली करौ कृत्वा व्यत्यस्ते तदनामिके ।
तन्नखे तर्जनीग्रस्ते त्रिखण्डाललितावहा ॥
कनिष्ठानामिकामध्या व्यत्यस्ताः पृष्ठतः क्रमात् ।
वलिता ऊर्ध्वयोगेन ऋजुतर्जनिकौ करौ ॥

शक्त्युत्थापनमुद्रैषेति ।

मतिशाणोल्लीढरूपे सत्यानन्देन धीमता ।
पूजारत्ने द्वितीयोऽयं मयूखः स्फुटतां गतः ॥

इति पूजारत्ने द्वितीयो मयूखः ॥ २ ॥

*

यत्पाद-पङ्कजयुग-स्मरण-प्रसादात्
मन्वादयोऽप्यधिगताखिलमन्त्रतत्त्वाः ।
संसिद्धिमापुरखिलां करुणार्द्रचित्तं
तं भावयामि सततं गुरुनाथमन्तः ॥ १ ॥

तत्र श्रीमान् साधकेन्द्रः ब्राह्मे मुहूर्ते चोत्थाय स्वगुरुं शिरसि स्मरेत् । यथा—

सहस्रदलपङ्कजे सकलशीतरश्मिप्रभं
वराभयकराम्बुजं विमलगन्धमाल्याम्बरम् ।
प्रसन्नवदनेक्षणं सकलदेवतारूपिणं
स्मरेत् शिरसि हंसगं तदभिधानपूर्वं गुरुम् ॥ १ ॥

इति ध्यात्वा वराभयमुद्रे प्रदर्श्य । लं पृथिव्यात्मने नमो गन्धं समर्पयामि । हं आकाशात्मने नमः पुष्प समर्पयामि । यं वाय्वात्मने नमो धूपं स० । रं तेजसात्मने नमो दीपं स० । वं अमृतात्मने नमो नैवेद्यं सम० । सं चन्द्रात्मने नमस्ताम्बूलं स० । इति सम्पूज्य, स्तुवीत । यथा—

नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे ।
विद्यावतारसंसिध्यै स्वीकृतानेकविग्रह ॥ १ ॥
भवाय नवरूपाय परमार्थस्वरूपिणे ।
सर्वाज्ञानतमोभेद भानवे चिद्घनाय ते ॥ २ ॥

स्वतन्त्राय दयाक्लृप्तविग्रहाय शिवात्मने ।
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ॥ ३ ॥
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ।
प्रकाशिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥ ४ ॥
पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः ।
सदामच्चित्तरूपेण विधेहि भवदासनम् ॥ ५ ॥
त्वत्प्रसादादहं देव कृतकृत्योऽस्मि सर्वदा ।
मायामृत्युमहापाशाद् विमुक्तोऽस्मि शिवोऽस्मि च ॥ ६ ॥
नमोऽस्तु गुरवे नित्यं सज्ज्ञानस्वरूपिणे ।
यस्य वाक्यामृतं हन्ति विषं संसारसंज्ञकम् ॥ ७ ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मादाशौ तमाश्रये ॥ ८ ॥
द्विनेत्रद्विभुजं शान्तं गुरुं पद्मासनस्थितम् ।
योगपीठे समासीनं नमामि स्थिरचेतसम् ॥ ९ ॥
प्रणमामि गुरुं शान्तं प्रत्यक्षं शिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकामार्थसिद्धये ॥ १० ॥

इति स्तुत्वा पञ्चमुद्राभिः प्रणमेत् । ताश्च—

चतुरस्रं मत्स्यमुद्रां सन्निरोधनमेव च ।
सम्मुखीकरणं योनिः पञ्चमुद्राः प्रकीर्तिताः ॥
ताभिर्नमेद् गुरुं नित्यं पञ्चवाणैः क्रमेण तु ॥ १ ॥

ततो हृदि देवतां ध्यायेत् । यथा—

लोहितां ललितां बाणचापपाशसृणीन्करैः ।
दधानां कामराजाङ्के यन्त्रितां मुदितां स्मरेत् ॥ १ ॥
हारग्रैवेयरत्नादि-मुद्रिकां नूपुरान्विताम् ।
विराजमानां तां दिव्यदिव्यांशुकविधारिणीम् ॥ २ ॥
शुचिस्मितां शक्तिवृन्द-गीताकर्णन-नन्दिताम् ।
सहजासन्नसंभोगैः सञ्जातानन्दविग्रहाम् ॥ ३ ॥
दयामदारुणापाङ्ग त्रिलोकितसुसाधकाम् ।
परितो भूषणैश्चित्रैः कर्णचामरकादिभिः ॥ ४ ॥
विराजमानान् द्विरदानश्वानपि तथाविधाम् ।
शक्तिभिर्दर्शितानग्रे पश्यन्तीमभितोत्सवम् ॥ ५ ॥
मध्यप्रधानदेव्यास्तु समुल्लासात्मकत्वतः ।
नवावरणशक्तीनां ध्यानं देव्या समं भवेत् ॥ ६ ॥

इति ध्यात्वा, पूर्वोक्तदिशाऽभ्यर्च्य स्तुवीत । यथा—

प्रातर्नमामि जगतां जनन्याश्चरणाम्बुजम् ।
श्रीमत्त्रिपुरसुन्दर्या नमिता या हरादिभिः ॥ १ ॥
प्रातस्त्रिपुरसुन्दर्याः नमामि चरणाम्बुजम् ।
हरिर्हरो विरञ्चिश्च सृष्ट्यादीन् कुरुते यथा ॥ २ ॥
प्रातस्त्रिपुरसुन्दर्याः नमामि पदपङ्कजम् ।
यत्पादमूकशिरसि भाति गङ्गा महेशितुः ॥ ३ ॥
प्रातः पाशाङ्कुशशर-चापहस्तां नमाम्यहम् ।
उद्यदादित्यसङ्काशां श्रीमत्त्रिपुरसुन्दरीम् ॥ ४ ॥

प्रातर्नमामि पादाब्जं ययेदं भासते जगत् ।
तस्यास्त्रिपुरसुन्दर्या यः प्रसादान्निवर्तते ॥ ५ ॥
यः श्लोकपङ्कजमिदं प्रातः प्रातः पठेन्नरः ।
तस्मै तद्यादात्मपदं श्रीमत्त्रिपुरसुन्दरी ॥

इति स्तुत्वा, चतुर्दशमुद्राः प्रदर्श्य । ऊर्ध्वाम्नायदीक्षितश्चेत् ।

त्रिकोणान्तःसमासीनं चन्द्रसूर्यसमप्रभम् ।
अर्धाम्बिकासमायुक्तं नवरत्नसमन्वितम् ॥ १ ॥
मन्दस्मितमुखाम्भोजे त्रिनेत्रं चन्द्रशेखरम् ।
पानपात्रं च चिन्मुद्रां त्रिशूलं पुस्तकं करैः ॥ २ ॥
विद्यासंसदि विश्राणं सदानन्दारुणेक्षणम् ।
महाषोढोदिताशेष - देवतागणसेवितम् ॥ ३ ॥
एवं चित्ताम्बुजे ध्यायेदर्धनारीश्वरं शिवम् ।
स्त्रीरूपं वा स्मरेद्देवि ! पुंरूपं वा विशेषतः ।
अथवा निष्कलं ब्रह्मसच्चिदानन्दविग्रहम् ॥ ४ ॥

इति ध्यात्वा, पूर्ववत्सम्पूज्य, स्तुवीत । यथा—

व्यालम्बि वेणीलतिकाविमिश्र-जटाकलाप-प्रतिशोभिशीर्षाम् ।
सिन्दूर-संशोभित-भस्मपुण्ड्रमर्धाम्बिकेशं मनसा स्मरामि ॥१॥
भिन्नाञ्जन-श्यामतमैकनेत्रं
द्वितीयचक्षुःस्फुटरुक्षभावम् ।
पत्रालिशोभाकुलितैकगण्डम्
अर्धाम्बिकेशं मनसा स्मरामि ॥ २ ॥

कपालमुद्रा-नवरत्नशोभि-
　　सुवर्णसत्कुण्डलभासमानम् ।
कर्णद्वयं संदधतं सुनासम्
　　अर्धाम्बिकेशं मनसा स्मरामि ॥ ३ ॥
प्ररूढकूर्चावलिशोभितैक-
　　भागेन गाङ्गेयसमानभासा ।
क्वचिन्मुखेन प्रतिशोभिमानम्
　　अर्धाम्बिकेशं मनसा स्मरामि ॥ ४ ॥
सुवर्णगारुत्मतकान्तिभासि
　　सरस्वतीभानुतनूजयानु ।
यत्कण्ठपीठे मिलितेव चित्र-
　　मर्धाम्बिकेशं मनसा स्मरामि ॥ ५ ॥
मुद्रां चिदाख्यामथ पुस्तकं च
　　शूलं कपालं च करैर्दधानम् ।
रुद्राक्षमालावलयाभिभासि-
　　रर्धाम्बिकेशं मनसा स्मरामि ॥ ६ ॥
कूर्पासबद्धैककुचं द्वितीय-
　　वक्षोजनिस्थामविलम्बिकृत्तिम् ।
शेषाहिभोगार्द्रविलग्नहार-
　　मर्धाम्बिकेशं मनसा स्मरामि ॥ ७ ॥
सुवर्णसंशोभिपरार्ध्यचीन-
　　वीरावली-चीवर-चारु-चक्रम् ।

नितम्बमाहेय-सुवर्णसूत्रम्-
अर्धाम्बिकेशं मनसा स्मरामि ॥ ८ ॥
अलक्तकारक्त-तलैकपादं
विभिन्नभस्मस्फुरितद्वितीयम् ।
सुवर्णकं कालविभूषणाढ्यम्
अर्धाम्बिकेशं मनसा स्मरामि ॥ ९ ॥
गुरुप्रसाद-प्रतिलब्ध-विद्या-
विलास-विद्योतित-वाक्प्रपञ्चः ।
अर्द्धाम्बिकेशस्तवमाततान
कामाभिधानं च पदोत्तराख्यः ॥१०॥

इति स्तुत्वा, नाभौ मन्त्रं विभाव्य, गुरुदेवतामन्त्रात्मनामैक्यं विचिन्त्य ।

अहं देवी न चान्योऽस्मि ब्रह्मैवाऽहं न शोकभाक् ।
सच्चिदानन्दरूपोऽहं शिवोऽहं नाऽत्र संशयः ॥

ततो मूलाद्यङ्गुलादूर्ध्वम् ।

प्रसुप्तभुजगाकारां स्वयम्भुवमधोमुखीम् ।
शङ्खावर्तक्रमेणैनां सार्द्धत्रिवलयाङ्किताम् ॥
मृणालतन्तुरुचिरां तरुणादित्यपाटलाम् ।
विद्युत्कोटिसमानाभां चन्द्रकोटिसुशीतलाम् ।
स्फुरद्दीपशिखाकारां मूलविद्यामयीं स्मरेत् ॥

इति ध्यात्वा, षट्चक्रभेदक्रमेण तां ब्रह्मरन्ध्रे नीत्वा, चिच्चन्द्रेण संयोज्य, तयोः सामरस्यमानन्दामृतमयं विभाव्य तद्गलितामृत-धारयाऽऽत्मानमाप्लाव्य देवीरूपमात्मानं विभाव्य । अहं देवीत्यादि पठित्वा । अजपासङ्कल्पं कुर्यात् । यथा—

गतारुणोदयादरुणोदयपर्यन्तं कृतेनाजपाजपेन षट्शताधिकैकविंशतिसहस्रेण गणेश-ब्रह्म-विष्णु-महेश्वरजीवात्मपरमात्मगुरवः प्रीयन्ताम्। व्यष्टौ। मूलाधारे चतुर्दले षट्शतेन भगवान् गणेशः साङ्गोपाङ्गावरणः सायुधः सवाहनः प्रीयताम्। मूलाधारे—

चतुर्दलाम्बुजकृतावासः करीन्द्राननः
पार्श्वद्वन्द्वग-ऋद्धि-बुद्धिसहितः स्वाग्रस्थसन्मूषकः।
बीजापूरगदाधनुस्त्रिशिखयुक्-चक्राब्जपाशोत्पल-
व्रीह्यग्र-स्वविषाणरत्नकलश-प्रोद्यत्करः पातु माम्॥ १॥

स्वाधिष्ठाने षट्दले सहस्रषट्केन भगवान् ब्रह्मा सां०।

स्वाधिष्ठानजलोद्भवे रसदले पद्मासने संस्थितो
माला-पुस्तकवल्लकीसरसिज-प्रोद्भासिहस्ताब्जया।
वाग्देव्या समलङ्कृतः स्वपुरतश्चक्राङ्गसंसद्वृतः
श्रीमत्पुस्तककुण्डिकाधरकरः पायाच्चतुरास्यः प्रभुः॥ १॥

मणिपूरे दशदले सहस्रषट्केन भगवान् विष्णुः सा०।

पाथोजे मणिपूरके दशदले सार्द्धं स्थितः पद्मया
पद्म-द्वन्द्व-विराजिताग्रकरया जाम्बूनदाभख्यया।
संयुक्ताग्रकरद्वयेन सुमनसानागान्तकेन स्तुतः
पायात् पद्मगदारिशङ्खविलसद्धस्तो मुकुन्दो जगत्॥ १॥

अनाहते द्वादशदले सहस्रषट्केन भगवान् महेश्वरः सां०।

पद्मेनाहतसंज्ञके रविदले सार्द्धं भवान्यास्थितो
नानाभूषणभूषिताङ्गनया गाङ्गेयसत्प्रख्यया।
वाताद्युं डमरु त्रिशूलपरशू हस्तैर्दधानो हरः
पायाद्भालविलोचने कु (हु) तवहं गङ्गां शिरस्युद्वहन्॥१॥

विशुद्धौ षोडशदले सहस्रेण भगवान् जीवः सां०।

विशुद्धाख्ये पद्मे शितकरकमलापत्रकलिते
स्थितोऽहं सारूढः सहविमलवुध्यावनितया ।
वहश्चिन्मुद्रां यो निमिषितदृशं वामकरम-
प्यथो तज्जानौ तं भजत सततं जीवमनघम् ॥ १ ॥

आज्ञायां द्विदले सहस्रेण भगवान् महेश्वरः सां० ।

भ्रू (भ्रू) मध्ये द्विदले समस्थितपदं पद्मासने संस्थितं
जानुद्वन्द्व-निविष्ट-हस्तयुगलं पत्न्या युतं मायया ।
योगिध्येयमनन्तशक्तिसहितं स्वेच्छाविलासोल्लस-
ल्लोकोत्पत्ति-विनाश-संस्थितिमहं वन्दे परेशं सदा ॥ १ ॥

विन्दौ नादान्ते सहस्रदले सहस्रेण भगवान् गुरुः सां० ।

सहस्रदलपङ्कजे शशधराकृतिश्रीजुषं
वराभयकराम्बुजं ललितशुक्लदेव्या युतम् ।
समस्तजनसंस्तुतं सकलदेवताराधितं
स्मरामि हृदि हंसगं शिरसि संस्थितं श्रीगुरुम् ॥ १ ॥

तत्र तत्र चक्रे तं तं विभाव्य पूर्ववत्पञ्चोपचारैः सम्पूज्य, जपं समर्पयेत् । आद्यारुणोदयादग्रिमारुणोदयपर्यन्तं कायिक-वाचिक-मानसिक-सांसर्गिक-व्यावहारिक-निखिलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं षट्शताधिकैकविंशतिसहस्रं सहजरूपोऽहं निश्वासोच्छ्वासतया अजपां जपिष्ये ।

अजपामन्त्रस्य हंसऋषिः, अव्यक्तगायत्री छन्दः, परमहंसो देवता, हं वीजम्, सः शक्तिः, जपे विनियोगः ।

ह्सां सूर्याय स्वाहा । ह्सीं सोमाय स्वाहा । ह्सूं निरञ्जनाय स्वाहा । ह्सैं निराभासाय० । ह्सौं अतनुसूक्ष्माय प्रचोदयात् । ह्सः अव्यक्तबोधात्मने० । इति करन्यास-षडङ्गानि विधाय । ध्येयो ब्रह्माग्निरुच्छिखः । इति ध्यात्वा । 'हंसः सोहं' इति मूलं यथाशक्ति जपित्वा, निवेदयेत् ।

अजपा नाम गायत्री देवानामपि दुर्लभा ।
हंसः पदं महेशानि प्रत्यहं जपते नरः ॥
मोहाद्यो वै न जानाति मोक्षस्तस्य न विद्यते ।
हकारेण बहिर्यान्तं विशन्तं च सकारतः ॥
चिन्तयेत् परमेशानि जीवं तं पक्षिरूपिणम् ।
अजपां जपतो नित्यं पुनर्जन्म न विद्यते ॥

*

अथ रश्मिमाला

रश्मिमालां स्मरेद्देवि प्रातरुत्थाय साधकः, इत्युक्तेः ।

रश्मिमालायां दक्षिणामूर्ति ऋषिः । गायत्र्यादीनि च्छन्दांसि । महात्रिपुरसुन्दरी देवता । विनियोगः ।

ध्यानम्—

असंख्यातमहः पुञ्जपिञ्जरीकृतविग्रहाम् ।
रश्मिमालामयीं वन्दे महात्रिपुरसुन्दरीम् ॥ १ ॥

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ १ ॥

यत इन्द्रभयामहे ततो नो अभयं कृधि । मघवं छग्धि तव तन्न अतिभिर्विद्विषो विमृधो जहि ॥ २ ॥

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुरएतु नः सोमपा अभयं करः ॥ ३ ॥

घृणिः सूर्य आदित्यः ॐ ॥ ४ ॥ परो रजसे सावदोम् । ॐ सूर्याक्षितेजसे नमः खेचराय नमः ॥५॥ असतो मां सद् गमय । तमसो मां

ज्योतिर्गमय । मृत्योर्मामृतं गमय ।। ६ ।। उष्णो भगवान् शुचिरूपः । हंसो भगवान् शुचिरप्रतिरूपः । विश्वरूपं घृणिनं जातवेदसं हिरण्मयं ज्योतिरेकं तपन्तं सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येव सूर्यः । ॐ नमो भगवते श्रीसूर्याय अहो वाहिनी वाहिन्यहो वाहिनी वाहिनी स्वाहा ।। ७ ।। वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । अपध्वान्तमूर्णु हि पूर्धिचक्षुर्मुमुग्ध्यस्मन्निधये वबद्धान् ।।८।। पुण्डरीकाक्षाय नमः । पुष्करेक्षणाय नमः । अमलेक्षणाय नमः । कमलेक्षणाय नमः । विश्वरूपाय नमः । श्रीमहाविष्णवे नमः । ॐ नमो भगवते गन्धर्वराज विश्वावसो ममाभिलषितां कन्यां च प्रयच्छ स्वाहा ।। ९ ।।

ॐ नमो भगवते रुद्राय पथिषदे स्वस्तिमानं पारय पारय ।।१०।।

ॐ तारे तुत्तारे तुरे स्वाहा ।। ११ ।।

ॐ श्रीअच्युताय नमः, अनन्ताय नमः, गोविन्दाय नमः ।। १२ ।।

ॐ श्रीं ह्रीं क्रीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा ।। १३ ।।

ॐ नमः शिवायै ॐ नमः शिवाय ।। १४ ।।

ॐ जूं सः पां पालय पालय ।। १५ ।।

नमो ब्रह्मणे धारणं मे अस्त्वनिराकारणं धारयिता भूयासं कर्णयोः श्रुतं माच्योढ्वं ममामुष्य ॐ ।। १६ ।।

अं आं क्षं ।।१७।।

कएईलह्रीं हसकहलह्रीं सहसकलह्रीं ।।१८।।

क्लीं ह्सैं ह्सौः ह्सौः ह्सैं क्लीं ।। १९ ।।

ऐं संसृष्टि नित्ये स्वाहा, संसृष्टिपूर्णे नमः स्वाहा, महासंहारिणि कृशे चण्डकालि फट् स्वाहा, ह्सक्ष्फ्रें महानन्तभास्करि महाचण्डकालि फट् हस्ख्फ्रें महाचण्डयोगेश्वरी ।। २० ।।

ॐ ऐं ह्रीं श्रीं ह्स्ख्फ्रें हसौं सहौः सह्ख्फ्रें श्रीं ह्रीं ऐं ॐ हसक्षमलवरयीं० यूं० यां० यां० यूं० यीं० यां० यीं० यूं० श्रीगुरुपादुकाभ्यो नमः स्वाहा ।। २१ ।।

ऐं क्लीं सौं: सौ: क्लीं ऐं ।। २२ ।।

ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे ममाभिलषित अन्नं देही स्वाहा ।।२३।।

एहि परमेश्वरि स्वाहा ।। २४ ।।

कामराजविद्या ।। २५ ।। ऐं नमो उच्छिष्टचाण्डालि मातङ्गि सर्ववशंकरि स्वाहा ।। २६ ।। ऐं वद वद वाग्वादिनि स्वाहा ।। २७ ।।

ओष्ठाभिधानानकुली दन्तैः परिवृतापविः ।
सर्वस्यै वाच ईशाना चारु मामिह वादयेत् ।। २८ ।।

ऐं ह्रीं श्रीं ऐं क्लीं सौ: ओष्ठाविधाना नकुलादन्तैः परिवृत्ता पविः सर्वस्यै वाच्य ईशान चारु मामिह वादयेत् ।। २८ ।।

ऐं क्लीं सौ: ऐं ह्रीं श्रीं नमो भगवति मातङ्गेश्वरि सर्वजन-मनोहरि सर्वराजवशङ्करि सर्वमुखरञ्जिनि सर्वस्त्रीपुरुषवशंकरि सर्व-दुष्टमृगवशंकरि सर्वलोकवशंकरि ह्रीं श्रीं क्लीं ऐं ।। २९ ।।

ॐ नमो वाराहि लूं उन्मत्तभैरवीपादुकाभ्यां नमः ।। ३० ।।

ॐ ऐं नमो वाराहि घारे स्वप्नं ठठ स्वाहा ।। ३१ ।।

ऐं ग्लौं क्लीं हुं फट् ऐं नमो भगवति महामाये तिरस्करिणि सकलपशुजनमनश्चक्षुस्तिरस्करणं कुरु कुरु स्वाहा ।। ३२ ।।

ऐं नमो भगवति वार्तालि वात्तालि वाराहि वाराहि वाराहमुखि वाराहमुखि अन्धे अन्धिन्यै नमः, रून्धे रून्धिन्यै नमः, जम्भे जम्भिन्यै नमः, मोहे मोहिन्यै नमः, स्तम्भे स्तम्भिन्यै नमः, अमुकं स्तम्भय स्तम्भय सर्वदुष्टप्रदुष्टानां सर्वेषां जिह्वास्तम्भं कुरु कुरु शीघ्रं वश्यं कुरु कुरु ऐं ग्लौं ठठ फट् स्वाहा ।।३३।।

कएईल हसकहल सकल ह्रीं ।।३४।।

इरि मिलि किरि किरि परि मिरोम् ।। ३५ ।।

ॐ ह्रीं नमो भगवति महात्रिपुरभैरवी त्रैपुर रक्षां कुरु कुरु संहर संहर सर्वरक्षो विभीषकान् हुं फट् स्वाहा ।। ३६ ।।

सूरंक्ताभ्यो योगिनीभ्यो नमः ।। ३७ ।।

सां सारसायवङ्कुशनाशय नाशय नमः ॥ ३८ ॥

तु मु लु षु मु लु षु ह्लीं चामुण्डायै नमः ॥ ३९ ॥

ॐ ह्लीं हसन्ति हसितालये मातङ्गि परिचारिके भयविघ्नापदां नाशं कुरु कुरु ठ ठ हुं फट् स्वाहा ॥ ४० ॥

ठं स्तम्भिन्यै नमः ॥ ४१ ॥

सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा ॥ ४२ ॥

रश्मिमालां पठेद्यस्तु प्रातरुत्थाय साधकः ।
तस्य सर्वसमृद्धिं स्यादित्याज्ञा परमेश्वरि ॥

इति रश्मिमाला समाप्ता ।

अथ वाञ्छाचिन्तामणिः

वाञ्छाचिन्तामणिं देवि प्रातरुत्थाय संस्मरेत् ।

यथा—ॐ ऐं क्षः नमो भगवते वासुदेवाय ।

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
असिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥

श्रीं ऐं क्लीं सौः ॐ नमो नारायणाय ॐ ह्लीं भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ।

ह्लीं श्रीं हक्लीं सौः ॐ नमः शिवाय ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

क्लीं हसकल ऐं ह्स्रौः कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा ।

प्रतद्विष्णुस्तवते वीर्येण मृगो नभीमकुचरोगरिष्ठा । यस्योरुषु त्रिषु विक्रमेण ष्वधि । यन्ति भुवनानि विश्वा । ह्लीं हसकलरडीं हसकलरडौः । स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथः । ॐ नमो भगवते वाराहरूपाय भूर्भुवः स्वः पतये भूपतित्वं मे देहि दापय स्वाहा । हंसः शुचिषद्वसुरन्तरिक्षद्धोता वेदिषदतिथिर्दुरोणसत् ।

नृषद्वरसहृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् । ह्रीं ईं क ए ई लह्रीं हसकहलह्रीं सकलह्रीं ।

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीदसादनम् ॥

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । ॐ ह्रीं दुं दुर्गायै नमः । ज्वल ज्वल शूलिनि दुष्टग्रह हुं फट् स्वाहा । उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितम् । यदि शक्यमशक्यं वा तन्मे दुर्गा भगवति शमय स्वाहा । स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः । धियो यो नः प्रचोदयात् । ॐ आपोज्योतिरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् । परोरजसि सावदोम् । उत्तिष्ठ पुरुष हरित-पिंगल-लोहिताक्ष-यक्षाधिपतये कुबेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं देहि दापय स्वाहा । गं ग्लौं ग्रीं नमो महागणपतये वरद क्ष्म्यैं ॐ नमः शिवाय नमो नारायणाय । त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् । सर्वं मे वशमानय क्षिप्रप्रसादनाय नमः । ॐ नमो नारायणाय स्वाहा ।

स्मरेच्चिन्तामणिं प्रातः सर्वसिद्धीश्वरो भवेत् ।

इति चिन्तामणिः ।

अस्य श्रीवाञ्छाकल्पलताख्य-महामन्त्रस्य । दक्षिणामूर्त्याद्या ऋषयः । पङ्क्त्यादीनि च्छन्दांसि । श्रीमन्महात्रिपुरसुन्दरी देवता । क ५ बीजम् । ह ६ शक्तिः । स ४ कीलम् । महात्रिपुरप्रसादसिद्ध्यर्थे पाठे विनियोगः । कूटैः षडङ्गः ।

ध्यायेत् कल्पतरोर्मूले देवीं सर्वार्थदायिनीम् ।
महागणपसंयुक्तां वादयन्तीं मुहुर्मुहुः ॥

द्वाभ्यां विभ्राजमानं वरकनकमहाशृङ्खलाभ्यां भुजाभ्यां
बीजापूरादिबिभ्रद्दशभुजललितं चन्द्रचूडं त्रिनेत्रम् ।
सन्ध्यासिन्दूरवर्णं स्तनभरनमितं तुन्दिलं सन्नितम्बं
कण्ठादूर्ध्वं करीन्द्रं युवतिमयमधः स्तौमि विद्यागणेशम् ॥

ॐ ऐं ह्रीं श्रीं लं क्लीं ग्लौं गं गूगूरीं क १५ ऐं क्लीं सौः । यदद्य-कच्च वृत्रहन्नुदगा अभिसूर्यः । सर्वं तदिन्द्र ते वशे । गं क्षिप्रप्रसादनाय गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा सौः क्लीं ऐं ॥ १ ॥

ॐ ऐं ह्रीं श्रीं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि । धियो यो नः प्रचोदयात् । गं क्षिप्रप्र० ॥ २ ॥ ॐ ऐं ह्रीं श्रीं त्र्यम्बकं यजामहे सुगन्धि पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् । गं क्षिप्रप्रसाद० ॥ ३ ॥

ॐ ऐं ह्रीं श्रीं जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः । गं क्षिप्रं० ॥ ४ ॥ ॐ ऐं ह्रीं० समानो मन्त्रः समितिः समानी समानं मनः सहचित्तमेषाम् । समानं मन्त्रमभिमन्त्र एव समानेन वो हविषा जुहोमि । गं क्षिप्र० ॥ ५ ॥

ॐ ऐं ह्रीं० संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इलस्पदे समिध्यसे स नो वसून्या भर । गं क्षिप्र० ॥ ६ ॥ ॐ ऐं ह्रीं० समानो मन्त्रः । गं क्षिप्र० ॥ ७ ॥

ॐ ऐं ह्रीं० जातवेदसे० गं क्षिप्र० ॥८॥ ॐ ऐं ह्रीं० त्रियम्बकं० । गं क्षिप्र० ॥ ९ ॥ ॐ ऐं ह्रीं० तत्सवितुर्वं० । गं क्षिप्र० ॥ १० ॥ ॐ ऐं ह्रीं० यदद्य० गं क्षिप्र० ॥ ११ ॥ ॐ ऐं ह्रीं० गणानां त्वा गणपतिं हवामहे कविं कवीनामुपवश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणा ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीदसादनम् । गं क्षिप्र० ॥ १२ ॥

ॐ भूः भद्रं० नो अपि वातय मनः । ॐ ह्रीं वं ठं अमृतरुद्राय आं ह्रीं क्रौं प्रतिकूलं मे नश्यत्वनुकूलं मे वशमानय स्वाहा ।

दमयन्तीनलाभ्यां च नमस्कारं करोम्यहम् ।
अविवादो भवेदत्र कलिदोषप्रशान्तिदः ॥
एकमत्यं भवेदेषां ब्राह्मणानां पृथग्धियाम् ।
निर्वैरतां च जायेत सम्वादाग्ने प्रसीद मे ॥ इत्येकपादः ।

ॐ ऐं ह्लीं॰ यदद्य॰ गं क्षिप्र॰ ॥ १ ॥ ॐ ऐं ह्लीं॰ तत्सवितु॰ गं क्षिप्र॰ ॥ २ ॥ ॐ ऐं ह्लीं॰ त्रियम्बकं य॰ गं क्षिप्र॰ ॥ ३ ॥ ॐ ऐं ह्लीं॰ जातवेदसे॰ । गं क्षिप्र॰ ॥ ४ ॥ ॐ ऐं ह्लीं॰ समानो मन्त्रः । गं क्षिप्र॰ ॥ ५ ॥ ॐ ऐं ह्लीं श्रीं॰ सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् । देवा भागं यथापूर्वे संजानाना उपासते । गं क्षिप्र॰ ॥ ६ ॥ ॐ ऐं ह्लीं॰ समानो मन्त्रः । गं क्षिप्र॰ ॥ ७ ॥ ॐ ऐं ह्लीं॰ जातवेदसं॰ । गं क्षिप्र॰ ॥ ८ ॥ ॐ ऐं ह्लीं त्रियम्बकं॰ गं क्षिप्र॰ ॥ ९ ॥ ॐ ऐं ह्लीं॰ तत्सवितुर्व॰ गं क्षिप्र॰ ॥ १० ॥ ॐ ऐं ह्लीं॰ यदद्य॰ गं क्षिप्र॰ ॥ ११ ॥ ॐ ऐं ह्लीं॰ अग्ने मन्युं प्रतिनुदन्यरेषामदब्धो गोपाः परिपाहि नस्त्वं॰ । प्रत्यंचो यन्तु निगुतः पुनस्ते ३ मैषां वित्तं प्रबुधां वि नेशत् गं क्षिप्र॰ ॥ १२ ॥ ॐ भुवः मरुतामोजसे स्वाहा । ॐ ह्लीं वं ठं॰ प्रसीद मे ॥ इति द्वितीयपादः ।

ॐ ऐं ह्लीं॰ यदद्य॰ गं क्षिप्र॰ ॥ १ ॥ ॐ ऐं ह्लीं॰ तत्सवितुर्व॰ । गं क्षिप्र॰ ॥ २ ॥ ॐ ऐं ह्लीं॰ त्रियम्बकं॰ गं क्षिप्र॰ ॥ ३ ॥ ॐ ऐं ह्लीं॰ जातवेदसे॰ गं क्षिप्र॰ ॥ ४ ॥ ॐ ऐं ह्लीं॰ समानो मन्त्रः गं क्षिप्र॰ ॥ ५ ॥ ॐ ऐं ह्लीं॰ समानो मन्त्रः गं क्षिप्र॰ ॥ ६ ॥ ॐ ऐं ह्लीं॰ समानो मन्त्रः । गं क्षिप्र॰ ॥ ७ ॥ ॐ ऐं ह्लीं॰ जातवेदसे॰ । गं क्षिप्र॰ ॥ ८ ॥ ॐ ऐं ह्लीं॰ त्रियम्बकं गं क्षिप्र॰ ॥ ९ ॥ ॐ ऐं ह्लीं॰ तत्सवितुर्व॰ गं क्षिप्र॰ ॥ १० ॥ ॐ ऐं ह्लीं॰ यदद्य॰ गं क्षिप्र॰ ॥११॥ ॐ ऐं ह्लीं॰ यो मामग्ने भागिनं सं तमथा भागं चिकीर्षति । अभागमग्ने तं कुरु मामग्ने भागिनं कुरु स्वाहा गं क्षिप्र॰ ॥ १२ ॥ ओं स्वः इन्द्रो विश्वस्य राजति । ओं ह्लीं वं ठं॰ प्रसीद मे । इति तृतीयपादः ।

ओं ऐं ह्रीं० यदद्य० गं क्षिप्र० ॥ १ ॥ ओं ऐं ह्रीं० तत्सवितुर्वं० गं क्षिप्र० ॥ २ ॥ ओं ऐं ह्रीं० त्रियम्बकं० गं क्षिप्र० ॥ ३ ॥ ओं ऐं ह्रीं० जातवेदसे० गं क्षिप्र० ॥ ४ ॥ ओं ऐं ह्रीं० समानो मन्त्रः गं क्षिप्र० ॥ ५ ॥ ओं ऐं ह्रीं० समानी व आकूतिः समाना हृदयानि वः । समानमस्तु वो मनो यथा वः सुसहासति गं क्षिप्र० ॥ ६ ॥ ओं ऐं ह्रीं० समानो मन्त्रः गं क्षिप्र० ॥ ७ ॥ ओं ऐं ह्रीं० जातवेदसे० गं क्षिप्र० ॥ ८ ॥ ओं ऐं ह्रीं० त्रियम्बकं गं क्षिप्र० ॥ ९ ॥ ओं ऐं ह्रीं० तत्सवितुर्वं० गं क्षिप्र० ॥१०॥ ओं ऐं ह्रीं० यदद्य० गं क्षिप्र० ॥११॥ ओं ऐं ह्रीं० अजैष्माद्यासनाम चाभूमानागसो वयम् । जाग्रत्स्वप्नः सङ्कल्पः पापो यं द्विष्मस्तं स ऋच्छतु यो नो द्वेष्टि तमृच्छतु । गं क्षिप्र० ॥ १२ ॥ ओं भूर्भुवः स्वः शं नो अस्तु द्विपदे शं चतुष्पदे । ओं ह्रीं वं ठं० प्रसीद मे । इति चतुर्थपादः ।

वाञ्छाकल्पलतायास्तु न होमो न च तर्पणम् ।
स्मरणादेव सिद्धिः स्यान्नात्र कार्या विचारणा ॥

इति वाञ्छाकल्पलता समाप्ता ।

*

कस्त्वां विना त्रिपुरसुन्दरि मामकीनां
कीनाशकारितरुजं परिमेतुमीशः ।
तस्मादलम्बि तव पादपयोजलीला
लीलाधवे मम हृदा परिचर्यभावः ॥ १ ॥

एतावती मयि गतेऽपि पदं यदम्ब !
नोल्लालसीति नयनाञ्चलचातुरी ते ।
तत्कारणं कलितमेव पदं प्रसन्ने
कामेश्वरे वितनुते ननु सानुभावम् ॥ २ ॥

ईशादिषु प्रणयिषु प्रपदप्रणाल्यां
प्रारब्धभावनिवहां वत वास्तिदृष्टिः ।
सत्यं तथाऽपि करुणेषु न मादृशेषु
किं दर्शितस्वविभवावत वोभवीति ॥ ३ ॥
लब्धं मया त्रिपुरसुन्दरि कोटिजन्म
पुण्यप्रपञ्चपरिपाकवशात् त्वदीयम् ।
श्रीनाथवक्त्रसरसीरुहतो रहस्यं
तत्साक्षितां कथय केन पथा व्रजेयम् ॥ ४ ॥
ह्रींकारमेव पुरतस्तव वादयन्ती-
मातङ्गिनी स्तननिवेशितचारुवीणाम् ।
लेभे न किं परिणतिं तव रश्मिरूपा-
मुत्फुल्लकोकनद-शोकद-दीप्तिदीप्ताम् ॥ ५ ॥
हर्त्ता पुरां तव शिवे प्रपदप्रपाती
लिप्तो नखामृतप्रकरांशुजालैः ।
सायुज्यमाप्त इव तैस्त्रिपुरे मृतांशु-
खण्डं बिभर्ति स यतः शिरसाङ्कभूतम् ॥ ६ ॥
सत्यावबोधसुखरूपिणि रूपि तु त्वां
शेकुर्न वेदवचनानि किमन्यवाचः ।
माया तवैव परिणाममुपैति विश्व-
भावेन भावयतु वा कथमम्ब मादृक् ॥ ७ ॥
कल्याणकारिणि सकृत्प्रणतः पदाग्रे
यस्ते वशंवररिपुप्रतिमाम्पृतस्य ।

ब्रूमः किमिन्दुवदनामदनापविद्धाः
शुद्धान्तरा अपि वदनमनुव्रजन्ति ॥ ८ ॥
हत्वां वभण्डमसुरं यदधारि रूपम्
एतद्धि लोभजननं भवलोचनानाम् ।
त्वद्भक्तवृन्द-शतकोटि-जनुप्रपञ्च
चेचीयमान सुकृत - प्रकर - प्रतापः ॥ ९ ॥
लब्धेऽपि दैवतककुद्विपदे यदेष
न व्याकरोति सुकृतीसुकृतप्रशंसाम् ।
युक्तं तदम्ब तव पादनखांशुभिन्न-
भास्वत्किरीटमणिवैभववश्चितस्य ॥१०॥
ह्रींकाररूपिणि दिशन्त्यभिधां तवैतां
वेदास्तथापि कलयन्ति न सामरस्याः ।
यामुस्मिकैहिकफले प्रथमाक्षराभ्यां
निर्वाणमेव चरमेण दिशत्यवश्यम् ॥११॥
सद्यस्तवांघ्रिकमले प्रणतिः प्रसूते
मातस्त्रिलोकजनुषां सतताधिपत्यम् ।
अज्ञानतोऽपरहसोऽनुसुराधिपत्य-
कामोऽसृजच्छतमखीप्रमथाधिनाथः ॥१२ ॥
कल्मापकण्ठपरिकल्पितताण्डवेषु
त्वं कम्बुकण्ठि यदि साक्षिपदं नयायाः ।
सामाजिकत्वमपरः कतरो विधत्तां
कोऽस्मै ददातु नयनान्तमपि प्रसादम् ॥१३॥

लक्षं कुरु त्रिपुरसुन्दरि मच्छरीरं
　　लक्षं भजे जननि नीजननी जनस्य ।
यत्कैरवं सितगभस्तिकरावमृष्टं
　　नैव प्रयाति विषयं वनतारकाणाम् ॥१४॥
ह्रींकारमेव तव सुन्दरि नामरूपे
　　ये व्याहरन्ति मुनयोऽत्र त ते नदन्तु ।
जाने रहस्यमिदमर्णविभागतोयं
　　सच्चित्सुखात्मकवपुस्तव संव्यनक्ति ॥१५॥
वक्त्रस्तनोत्तमशरीरमितीरयन्ती
　　योषिद्-वशीकरण-वित्तकमेतदन्ये ।
तुर्यस्वरं हरयुजाहसयोगतोऽपि
　　सायुज्यभक्तिपरिचायकमेवमन्ये ॥१६॥
ह्रींकारत्रयनद्धमेतदनिशं यत्कण्ठपीठे लुठ-
त्यद्धावद्धविनोदमुद्धततरस्पर्शालुविद्धानिकृत् ।
संख्यावत्परिपीतकीर्तिरवनीपालोत्तमाङ्गस्फुरन्
माणिक्योत्त्वपरिष्कृताङ्घ्रिकमलः शम्भोः पदं याति सः ॥१७॥
त्रिपुरे त्रिमूर्तिमुकुटाञ्चितप्रभे कविसामराजरचितस्तवस्तवः ।
भजतां पदेऽर्थमकरन्दतुन्दिलः कुसुमोपहारपदवीं दवीयसीम ॥१८॥

इति स्तुत्वा ततः प्रवहत् श्वासानुसारेण पादं पुरस्कृत्योत्थाय पल्यङ्कपादसमीपे। ॐ ह्रीं विघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा। इति मन्त्रेणान्नं व्यञ्जनादिनावलिमाहृत्य। 'ॐ ह्रीं चाण्डालिन्यै स्वाहा।' इति मन्त्रेण पुरीषबलिं मन्त्रेणाहृत्य हस्तपादे प्रक्षालनावसरे ॐ ह्रीं चाण्डालिनीं तर्पयामि इति मनसोच्चरेत्। आचम्य, ॐ

क्लीं कामदेवाय सर्वजनप्रियाय नमः स्वाहा। इति दन्तान् संशोध्य 'ऐं वद वद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदय क्लेदय महाक्षेत्रं कुरु कुरु क्लीं सौः मोक्षं कुरु सौः' इति जिह्वामुल्लिख्य मूलेन दिननित्यायापात्रमुखं प्रक्षाल्य वाग्भवेन गण्डूषान् कृत्वा। 'सौः' इति शक्तिबीजेन हस्तौ प्रक्षाल्य करेण जलमादाय। 'ॐ ऐं कं १५ अं ५० ऐं' इति त्रिवारमुच्चार्य तज्जलं सुन्दरीचरणप्रभारक्तं विभाव्य। वाङ्मित्वं चादिशक्ति कवित्वं व्याख्यातृत्वं देहि मे स्वाहा। इत्युच्चार्य पिबेत्।

ततो देवतागारमागत्य घण्टादिशब्देन देवीमुत्थाप्य, निर्माल्यं विसर्ज्य नीराजनं विधाय स्तुवीत। यथा—

विरञ्च्यादिभिः पञ्चभिर्लोकनाथैः समूहे महानन्दपीठे निषण्णम्।
धनुर्बाणपाशाङ्कुशप्रोतहस्तं महस्त्रैपुरं शङ्करा‌द्वैतमव्यात् ॥१॥
यदन्नादिभिः पञ्चभिः कोशजातैः शिरःपक्षपुच्छात्मकैरन्तरन्तः।
निगूढे महानन्दपीठे निषण्णं पुरारेरतोऽन्तःपुरं देवनित्यम् ॥२॥
विरञ्च्यादिरूपैः प्रपञ्चं विहृत्य स्वतन्त्रा यदा स्वात्मविश्रान्तिमेषि।
तदामानमातृ प्रमेयातिरिक्तं परानन्दमीडे भवानि त्वदीयम् ॥३॥
विनोदाय चित्तं यदेकं विभज्य द्विधा देवि जीवः शिवञ्चेति नाम्ना।
शिवस्यापि जीवत्वमापादयन्ती पुनर्जीवमेनं शिवं चाकरोषि ॥४॥
समाकुञ्चमूलं हृदि न्यस्य वायुं मनोभ्रूबिलं प्रापयित्वा निवृत्ताः।
ततः सच्चिदानन्तरूपे यदेते भजन्त्यम्ब जीवं शिवत्वेन केचित् ॥५॥
शरीरेऽतिकृष्टे रिपौ पुत्रवर्गे सदा भीतिमूले कलत्रे धने वा।
न कश्चिज्जहाति स्पृहां देवि चित्तं कथं त्वत्कटाक्षं विना तत्त्वबोधः ॥६॥
शरीरे धनेऽपत्यवर्गे कलत्रे विरक्तस्य सद्देशिकादिष्टबुद्धेः।
यदाकस्मिकज्योतिरानन्दरूपं समाधौ समं तत्त्वमस्यम्ब सत्यम् ॥७॥

मृषान्यो मृषान्यः परोमिश्रमेनं परं प्राकृतं चापरो बुद्धिमात्रम् ।
प्रपञ्चं मिमीते मुनीनां गणोऽयं तदेतत्त्वमेवेति न त्वां जहीम ॥८॥
निवृत्तिः प्रतिष्ठा च विद्या च शान्तिस्ततःशान्त्यतीति पञ्चात्मिकादिभिः
कलाभिः परा पञ्चविंशात्मिकाभिस्त्वमेकैव सेव्या शिवाभिन्नरूपा॥९॥
अगाधेऽत्र संसारपङ्के निमग्नं कलत्रादिभारेण सन्नं नितान्ते ।
महामोहया शौधबन्धं त्रिचरान्मांसमुद्धर्तुमम्ब त्वमेकैव शक्ता ॥१०॥
समारभ्य मूलाद्गता ब्रह्मरन्ध्रं भवद्दिव्यचक्रेश्वरी नामभाजम् ।
महासिद्धसङ्घातकल्पद्रुमाभानवाप्यम्बनादानुपास्ते सयोगी ॥११॥
गणेशग्रहैरम्ब नक्षत्रपङ्क्त्या तथा योगिनीराशिपीठैरभिन्नम् ।
महाकालमात्मानमामृष्यलोकं विधत्ते कृतं वाञ्छितं वागतं वा ॥१२॥
लसत्तारहारामतिस्वच्छचैलां वहन्ती करे पुस्तकं चाक्षमालाम् ।
सरच्चन्द्रकोटिप्रभाभासुरां त्वां सकृद्भावयन् भारतीवल्लभः स्यात्॥१३॥
समुद्यत्सहस्रार्कबिम्बाभवक्त्रां स्वभासैव सिन्धूरितामुचकोटि ।
धनुर्बाणपाशाङ्कुशान्धारयन्तीं स्मरन्तः स्मरं चापि संमोहयेयुः ॥१४॥
मणिस्यूतताटङ्कशोणास्यबिम्बा हरित्यम्बवस्त्राश्चिदुल्लासभृताम् ।
हृदाचिन्तयन् तप्तहेमप्रभां त्वां श्रियो नाशयत्यम्ब चाञ्चल्यभावम्॥
क्रमेणैव वृद्धां क्रमेणैव रूढां प्रपञ्चस्य कालं प्रसङ्ख्यातुमीले ।
उपास्ते बहिश्चान्तरे यः कलायासयात्यञ्जसा षोडशीं साक्षिणीं त्वाम्॥
स्वमुख्येषु शब्दादिकानेकवृत्तीन् गुणान्यं च दृश्योऽभवद्वर्णवल्याः ।
अभिन्नानुपालक्ष्यशब्दार्थरूपं तदेतज्जगत्त्वन्यभयं भावयन्ति ॥१७॥
महामन्त्रराजान्तबीजं पराख्यं स्वतोबिन्दुबिन्दुद्वयाढ्यं हसार्धम् ।
भवद्वक्त्रवक्षोजगुह्याभिधानं स्वरूपं सकृद्द्भावयेत्सत्त्वमेव ॥१८॥

अथान्ये विकल्पेषु निर्विण्णचित्तास्तदेवं समादायबिन्दुं त्रपन्ते ।
परानन्दसिन्धावनान्ते निमग्नाः पुनर्गर्भरन्ध्रं न पश्यन्ति धीराः ॥

त्वदुन्मेषलीलासक्तलब्धाधिकारान्
विरञ्च्यादिकान् त्वद्गुणाम्भोधिबिन्दून् ।
भजन्तस्तितीर्षन्ति सिन्धुं शिवे ता-
विकीं नास्ति किंश्वा भवेयुः ॥ २० ॥

कदा वा भवत्पादयोस्तेन तूर्णं भवाम्भोधिमुत्तीर्य पूर्णं तरङ्गैः ।
निमज्जन्तमेनं दुराशाविषाब्धौ समालोक्य लोकं हसन्पर्युदासे ॥२१॥
कदा वा हृषीकाणि साम्यं भजेयुः कदा वा न शत्रुर्न मित्रं भवामि ।
कदा वा दुराशा विषूची विलो यः कदा वा मनो मे समूलं विनश्येत् ॥
नमो वा कमाशास्महे देवि युष्मत्पदाम्भोजयुग्मायतिग्माय पापे ।
विरञ्च्यादिभास्वत्किरीटप्रतोली प्रदीपायमानप्रभावन्नखाय ॥२३॥
कचे चन्द्ररेखं कुचे तारहारं करे स्वादु चापं शरे द्व्यपदौघम् ।
स्मरारिस्मरारेरभिप्रायमेकं मदाघूर्णनेत्रं मदीयं निधानम् ॥२४॥
शरेष्वेव नासा धनुष्वेव जिह्वा जपापाटले लोचने ते स्वरूपम् ।
त्वगेषा भवच्चन्द्रखण्डे श्रवेऽहं गुणास्ते मनोवृत्तिरम्ब त्वयि स्यात् ॥
जगत्कर्मधीरां वचोद्यूतकीरां कुचन्यस्तहारां कृपासिन्धुपूराम् ।
भवाम्भोधिपारां महापापदूरां भजे वेदसारां शिवप्रेमधाराम् ॥२६॥
सुधाम्भोधिपूरे चिदानन्दनीरे समुत्फुल्लनीये सुरत्नान्तरीये ।
मणिव्यापिजाले स्थिरे हेमशाते मनोजारि वामे निषण्णं मनो मे ।२७।
दृगं ते विलोला सुगन्धीषु माला प्रपञ्चेन्द्रजाला विपत्सिन्धुकूला ।
मुनिस्वान्तराला नमल्लोकपाला हृदि प्रेमशिला कृता शम्भुलीला।२८।

जगज्जालमेतत्त्वयैवाम्ब सृष्टं त्वमेवाददासीन्द्रियैरर्थजालम् ।
त्वमेकैव कर्त्री त्वमेकैव भोक्त्री न मे पुण्यपापे न मे बन्धमोक्षौ॥२९॥
इति प्रेमभावेन किञ्चिन्मयोक्तं न बुध्वैव तत्त्वं मदीयं त्वदीयम् ।
विनोदाय बालं स्वमौढ्यं हि मातुस्तदेवं प्रकारां स्तुतिं मे गृहाण ॥
भुजङ्गप्रयाताख्यमेतत्पठेद् यो भुजङ्गप्रयातं महाकालवेगम् ।
विजित्याश्रयालीलया भक्तिभाजां वितर्तु समीक्ष्ये नृणां भोगमोक्षौ ॥

इति सुन्दरीभुजङ्गप्रयातम् । इति स्तुत्वा स्नानाय गच्छेत् ।
यागमन्दिरप्रवेशादि चक्रपूजान्तं ब्रह्मविद्यासंप्रदाय गुरुस्तोत्रम्—

अथ ललितासपर्यापद्धतिः

श्रीसुन्दरीं च कामेशं सद्गुरुं च विनायकम् ।
नत्वा वदामि ललितासपर्यापद्धतिं क्रमात् ॥ १ ॥

अथ साधकः कृतमङ्गलस्नानः पूजागृहमागत्य मन्दिरद्वारोर्ध्वभागे । ॐ ऐं ह्रीं श्रीं भद्रकाल्यै नमः । दक्षे—ॐ ऐं ह्रीं श्रीं भैरवाय नमः । ॐ वामे ऐं ह्रीं श्रीं लम्बोदराय नमः । इति पूजयित्वा अन्तःप्रविश्य बालातृतीयबीजेन (सौः) इत्यनेन द्वादशवारमन्त्रिते मूलमन्त्रोक्षिते चित्रकबाद्यन्यतमासने । ॐऐं ह्रीं श्रीं आधारशक्तिकमलासनाय नमः । इति पुष्पाक्षतैरभ्यर्च्य प्राङ्मुख उदङ्मुखो वा उपविश्य, प्राणानायम्य, देशकालौ सङ्कीर्त्य मम श्रीललितामहात्रिपुरसुन्दरीअम्बाप्रीत्यर्थं यथाशक्ति-सपर्याक्रमं निर्वर्तयिष्ये, इति सङ्कल्प्य । ॐ ऐं ह्रीं श्रीं समस्तगुप्तप्रकटसिद्धयोगिनीचक्रश्रीपादुकाभ्यां नमः । इति मूर्ध्नि बद्धाञ्जलिः । ॐ ऐं ह्रीं श्रीं हस्ख्फ्रें हसक्षमलवरयूं सहक्षमलवरयूं हसौं स्हौः श्रीगुरुपादुकां पूजयामि । इति मन्त्रान्ते सुमुखवृत्तचतुरस्रमुद्गरयोन्याख्या त्रिःपञ्चमुद्राभिः श्रीगुरुम् ।

ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानाय स्वाहा। इति मन्त्रेण गणपतिस्मरणं (जपं) स्ववामदक्षिणयोः क्रमेण प्रणम्य। ऐं अस्त्राय फट्। इति अस्त्रमन्त्रेण अङ्गुलिना प्रदक्षिणीकृत्य, उदकोपस्पर्शः। ततो जलपूर्णं वर्धनीपात्रं स्ववामभागे गन्धपुष्पाक्षतादि-संपर्यासामग्रीं स्वदक्षिणदेशे क्षीरकलशादिकं देव्याः पश्चाद्भागे निधाय दीपानभितः प्रज्वालयेत्। ततः स्वपुरतः प्रक्षालितपीठोपरिस्थितश्रीचक्रे। ऐं ह्रीं श्रीं मूलेन पुष्पाञ्जलिं दत्त्वा। ॐ ऐं ह्रीं श्रीं मूलप्रथमखण्डं नमः। इति त्रिकोणस्य स्वाग्रकोणम्।

ॐ ऐं ह्रीं श्रीं मूलद्वितीयखण्डं नमः, इति ईशानकोणम्। ॐ ऐं ह्रीं श्रीं मूलतृतीयखण्डं नमः, इत्याग्नेयकोणमभ्यर्च्य भूतशुद्धिं विदध्यात्।

अथ भूतशुद्धिः। पिङ्गलया ३ वायुमन्तराकृष्य। ३ मूलशृङ्गाटकात्सुषुम्ना पथेन जीवशिवं परमशिवपदे योजयामि स्वाहा। इति मूलाधारस्थितं जीवमात्मानं सुषुम्ना वर्त्मना ब्रह्मरन्ध्रं नीत्वा। परमशिवेनैकीभूतं भावयित्वा। ईडया पापपुरुषं विरचयेत्। ॐ ऐं ह्रीं श्रीं यं सङ्कोचशरीरं शोषय शोषय स्वाहा। इति नीचशरीरं शोषितं रं सङ्कोचशरीरं दह दह पच पच स्वाहा। इति निजशरीरं भस्मीकृतम्। ऐं ह्रीं श्रीं परमशिवामृतं वर्षय वर्षय स्वाहा। इति अमृतवर्षितम्। इदं शाम्भवशरीरमुत्पादयोत्पादय स्वाहा। इति तद्भस्मना दिव्यं शरीरमुत्पन्नं भावयेत्। ३ हंसः सोऽहम्। अवतरावतर शिवदाज्जीवसुषुम्ना पथेन प्रविश्य मूलशृङ्गारकमुल्लसोल्लस ज्वल ज्वल प्रज्वल प्रज्वल हंसः सोऽहं स्वाहा। इति परशिवेनैकीकृतं जीवं पुनः सुषुम्ना वर्त्मना मूलाधारे स्थापितं विचिन्तयेत्। इति भूतशुद्धिः।

अथ प्राणप्रतिष्ठा। ॐ आं सोऽहम्। इति मन्त्रं हृदि दक्षकरं निधाय त्रिः पठेत्। गर्भाधानादिपञ्चदशसंस्कारसिध्यर्थं पञ्चदशप्रणवावृत्तीः करिष्ये। ततः त्रिवारं प्राणानायम्य।

अपसर्पन्तु ते भूता   भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

इति मन्त्रेण भूमिं वामपादेन त्रिस्ताडयेत् । 'अथ नमः' इत्यङ्गुष्ठमन्त्रमुच्चारयन् कुशेन शिखां बद्ध्वा श्रीदेवीरूपमात्मानं भावयन् स्वदेहे न्यासजालात्मकं वज्रकवचं विदधीत । न्यासाश्च ।

अथ संविदाप्रयोगः । ॐ अस्य श्रीमातृकान्यासस्य ब्रह्मणे ऋषये नमः शिरसि । गायत्र्यै छन्दसे नमः मुखे । श्रीमातृकासरस्वत्यै देवतायै नमः हृदये । हल्भ्यो बीजेभ्यो नमः गुह्ये । स्वरेभ्यः शक्तिभ्यो नमः पादयोः । बिन्दुभ्यः कीलकेभ्यो नमः नाभौ । मम श्रीविद्याङ्गत्वेन न्यासे विनियोगः । करसम्पुटे सबिन्दु सर्वमातृकया त्रिव्यापकं सर्वाङ्गे अञ्जलिना ।

ॐ ऐं ह्रीं श्रीं क्लीं सौः अं कं खं गं घं ङं आं अं अंगुष्ठाभ्यां नमः ।
ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः इं चं धं जं अं गं ईं तर्जनीभ्यां नमः ।
मूलं ६ ऊं उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः ।
मूलं ६ एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः ।
मूलं ६ ओं पं फ बं भं मं औं कनिष्ठिकाभ्यां नमः ।
मूलं ६ अं यं रं लं वं शं षं सं क्षं अः करतलकरपृष्ठाभ्यां नमः ।
एवं हृदयादि ।

ध्यानम्----

पञ्चाशदर्णैरचिताङ्गभागां धृतेन्दुखण्डां कुमुदावदाताम् ।
वराभये पुस्तकमक्षसूत्रं भजे गिरं संदधतीं त्रिनेत्राम् ॥

इति ध्यात्वा । मनसा सम्पूज्य पुष्पाञ्जलिं दत्त्वा । मातृकां न्यसेत् ।
ऐं ह्रीं श्रीं ऐं क्लीं सौः अं नमः शिरसि ।

मूलं—६ आं नमः मुखे। ६ इं नमः दक्षनेत्रे। ६ ईं नमः वामनेत्रे। ६ उं नमः दक्षकर्णे। ६ ऊं नमः वामकर्णे। ६ ऋं नमः दक्षिणनासापुटे। ६ ॠं नमः वामनासापुटे। ६ ऌं नमः दक्षगण्डे। ६ ॡं नमः वामगण्डे। ६ एं नमः ऊर्ध्वोष्ठे। ६ ऐं नमः अधरोष्ठे। ६ ओं नमः ऊर्ध्वदन्तपङ्क्तौ। ६ औं नमः अधोदन्तपङ्क्तौ। ६ अं नमः शिरसि। ६ अः नमः मुखान्ते। ६ कं नमः दक्षबाहुमूले। ६ खं नमः वामबाहुमूले। ६ गं नमः मणिबन्धे। ६ घं नमः तदङ्गुलिमूले। ६ ङं नमः तदङ्गुल्यग्रे। ६ चं नमः वामबाहुमूले। ६ जं नमः तन्मणिबन्धे। ६ झं नमः तदङ्गुलिमूले। ६ ञं नमः तदङ्गुल्यग्रे। ६ टं नमः दक्षोरुमूले। ६ ठं नमः तज्जानुनि। ६ डं नमः तज्जङ्घापादसङ्घे। ६ ढं नमः तदङ्गुलिमूले। ६ णं नमः तदङ्गुल्यग्रे। ६ तं नमः वामोरुमूले। ६ थं नमः तज्जानुनि। ६ दं नमः तज्जङ्घापादसन्धौ। ६ धं नमः तदङ्गुलिमूले। ६ नं नमः तदङ्गुल्यग्रे। ६ पं नमः दक्षपार्श्वे। ६ फं नमः वामपार्श्वे। ६ बं नमः पृष्ठे। ६ भं नमः नाभौ। ६ मं नमः जठरे। ६ यं नमः हृदि। ६ रं नमः दक्षकक्षे। ६ लं नमः अपरगले। ६ वं नमः वामकक्षे। ६ शं नमः हृदादिदक्षकराग्रान्तम्। ६ षं नमः हृदादिवामकराग्रान्तम्। ६ सं नमः हृदादिदक्षपादाग्रान्तम्। ६ हं नमः हृदादिवामपादाग्रान्तम्। ६ ळं नमः हृदादिगुह्यान्तम्। ६ क्षं नमः हृदादिमूर्धान्तम्।

अथ करशुद्धिः

ॐ ऐं ह्रीं श्रीं क्षं मध्यमाभ्यां नमः। ऐं ह्रीं श्रीं आं अनामिकाभ्यां नमः। ३ सौः कनिष्ठिकाभ्यां नमः। ३ अं अङ्गुष्ठाभ्यां नमः। ३ आं तर्जनीभ्यां नमः। ३ सौः करतलकर पृष्ठाभ्यां नमः।

अथ आत्मरक्षान्यासः

ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः श्रीमहात्रिपुरसुन्दर्यात्मानं रक्ष रक्ष

इति हृदये अञ्जलिं दद्यात् । त्रिवारं पठेत् ।

अथ चतुरासनन्यासः

३ ह्रीं क्लीं सौः देव्यात्मासनाय नमः । इति स्वस्य मूलाधारे न्यस्य । ३ हैं हूं क्लीं सौः श्रीचक्रासनाय नमः । ३ हूंसैं हूं क्लीं हूं सौः सर्वमन्त्रासनाय नमः । ३ ह्रीं क्लीं ब्लें साध्यसिद्धासनाय नमः । इति त्रिभिर्मन्त्रैर्मुहुर्मुहुः पुष्पप्रक्षेपणेन चक्रमन्त्रदेवतासनानि श्रीचक्रे न्यसेत् ।

बालाक्षरन्यासः

ऐं ह्रीं श्रीं ऐं हृदयाय नमः । ३ क्लीं शिरसे स्वाहा । ३ क्लीं सौः शिखायै वषट् । ३ एं कवचाय हुम् । ३ क्लीं नेत्रत्रयाय वौषट् । ३ सौः अस्त्राय फट् ।

अथ वाग्देवतान्यासः

ॐ ऐं ह्रीं श्रीं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः ब्लीं वशिनि वाग्देवतायै नमः शिरसि ।

३ कं खं गं घं ङं कलह्रीं कामेश्वरी वाग्देवतायै नमः ललाटे ।

३ चं छं जं झं ञं ब्लीं मोदनी वाग्देवतायै नः भ्रूमध्ये ।

३ टं ठं डं ढं णं ब्लूं विमला वाग्देवतायै नमः कण्ठे ।

३ तं थं दं धं नं श्रीं अरुणावाग्देवतायै नमः हृदि ।

३ पं फं बं भं मं ह्स्लव्यूं जयनी वाग्देवतायै नमः नाभौ ।

३ यं रं लं वं क्ष्म्र्यं सर्वेश्वरी वाग्देवतायै नमः लिङ्गे ।

३ शं षं सं हं ळं क्षं क्ष्म्रीं कौलनीवाग्देवतायै नमः मूलाधारे ।

इति न्यसेत् ।

अथ मूलार्णन्यासः

३ कं नमः शिरसि । ३ एं नमः मूले । ३ ईं नमः हृदि ।

३ लं नमः दक्षनेत्रे ३ । ह्रीं नमः वामनेत्रे । ३ हं नमः भ्रूमध्ये ।

३ सं नमः दक्षश्रोत्रे । ३ कं नमः वामश्रोत्रे । ३ हं नमः मुखे ।

३ ऐं नमः दक्षभुजे। ३ ह्लीं नमः वामभुजे। ३ सं नमः पृष्ठे।

३ कं नमः दक्षजानुनि। ३ लं नमः वामजानुनि। ह्लीं नमः नाभौ। इति न्यासान् विधाय।

दीपपूजा----ऐं ह्लीं श्रीं दीपनाथाय नमः। इति दीपपूजां कृत्वा पूजामारभेत्।

अथ चक्रराजे मन्दिरपूजा

३ अमृताम्भोनिधये नमः। ३ रत्नद्वीपाय नमः।

३ नानावृक्षमहोद्याय नमः। ३ कल्पवाटिकायै नमः।

३ सन्तानवाटिकायै नमः।

३ हरिचन्दनवाटिकायै नमः। मन्दारवाटिकायै नमः।

३ पारिजातवाटिकायै नमः। कदम्बवाटिकायै नमः।

३ पुष्परागरत्नप्रकारायै नमः। ३ पद्मरागरत्नप्रकारायै नमः। ३ गोमेदरागरत्नप्रकारायै नमः। ३ वज्ररत्नप्रकारायै नमः। ३ वैडूर्यरत्नप्रकारायै नमः। ३ इन्द्रनीलरत्नप्रकारायै नमः।

३ मुक्तारत्नप्रकारायै नमः। ३ मरकतरत्नप्रकारायै नमः।

३ विद्रुमरत्नप्रकारायै नमः। ३ माणिक्यमण्डपाय नमः।

३ सहस्रस्तम्भमण्डपायै नमः। ३ अमृतवापिकायै नमः।

३ आनन्दवापिकायै नमः। ३ विमर्शवापिकायै नमः।

३ बालातपाद्गोराय नमः। ३ चन्द्रिकाद्गोराय नमः।

३ महाश्रृङ्गारपरिखायै नमः। ३ महापद्माख्यै नमः।

३ चिन्तामणिगृहराजाय नमः। ३ पूर्वाम्नायामयपूर्वद्वाराय नमः।

३ दक्षिणाम्नायमयदक्षिणद्वाराय नमः।

३ पश्चिमाम्नायद्वाराय नमः। ३ उत्तराम्नायद्वाराय नमः।

३ रत्नप्रदीपवलाय नमः। ३ मणिमयमहासिंहासनाय नमः।

३ ब्रह्ममयैकमन्त्रपादाय नमः। ३ विष्णुमयैकमन्त्रपादाय नमः।

३ रुद्रमयैकमन्त्रपादाय नमः। ईश्वरमयैकमन्त्रपादाय नमः।

३ सदाशिवमन्त्रफलकाय नमः । हंसतूलतलिभाय नमः ।
३ हंसतूलमहोपाद्याय नमः । ३ कौसुम्भस्तरणाय नमः ।
३ महावितानकाय नमः । ३ महावनिकाय नमः ।
इति मन्दिरपूजां कृत्वा । पात्रासादनं कुर्यात् ।

स्वस्य वामतो देव्याः पुरतो गन्धाक्षतकुसुमार्चितेन त्रिवारं मूलमन्त्रामन्त्रितेन वर्धनीपात्रगतेन शुद्धानाम्भसा भुवि बिन्दुत्रिकोणषट्कोणवृत्तयतुरस्रात्मकं मण्डलं परिकल्प्य मत्स्यमुद्रां प्रदर्श्य पुष्पैरभ्यर्च्य चतुरस्रस्य अग्नीशाननिर्ऋतिवायुकोणेषु मध्यपूर्वादिदिक्षु च क्रमेण त्रितारिपूर्वक बाला षडङ्गमन्त्रैः पूजयेत् ।
(अत्र पूर्वादिदिक्षु चतसृषु एकमेवास्त्रं ज्ञेयम्) ।

तत्र मण्डले । ऐं ह्रीं श्रीं अस्त्राय फट् इति क्षालितमाधारम् । ऐं ह्रीं श्रीं यं अग्निमण्डलाय दशकलात्मने वर्धनीकलशमण्डलाय नमः ।

मण्डलं मूलेन समभ्यर्च्य कर्पूरादिवासितजलपूरितं कलशं गन्धपुष्पाक्षतैरलंकृत्य मण्डलोपरि संस्थापयेत् ।

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ॥
अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः ।

ॐ आपो वा इदं सर्वंविश्वा भूतान्यापः प्रणवा आपः पशव आपोऽन्नमापोऽमृतमापः सम्राडापो विराडापः स्वराडापश्छन्दांस्यापो ज्योतींष्यापो यजूंष्यापः सत्यमापः सर्पा देवता आपो भूर्भुवस्सुवराप ॐ ।

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

सर्वे समुद्राः सरितस्तीर्थानि च नदा ह्रदाः ।
आयन्तु देवीपूजार्थं दुरितक्षयकारकाः ॥

मूलेनाष्टवारमभिमन्त्र्य, धेनुमुद्रां प्रदर्श्य, तज्जलेन पूजोपकरणानि आत्मानं च प्रोक्षयेत् ।

सामान्यार्घविधिः

वर्धनीपात्रस्य दक्षिणतः वर्धनीपात्रगतेन जलेन विन्दुत्रिकोण-षट्कोण-वृत्त-चतुरस्रात्मकं मण्डलं मत्स्यमुद्रया निर्माय ।

चतुरस्रे अग्नीशासुरवायुकोणेषु मध्ये दिक्षु च बालाषडङ्गैः सम्पूजयेत् । यथा—

४ ऐं हृदयाय नमः । हृदयशक्तिश्रीपादुकां पूजयामि नमः ।
४ क्लीं शिरसे स्वाहा । शिरः शक्तिश्रीपादुकां ,,
४ सौः शिखायै वषट् । शिखाशक्तिश्रीपादुकां ,,
४ ऐं कवचाय हुं । कवचशक्तिश्रीपादुकां ,,
४ क्लीं नेत्रत्रयाय वौषट् । नेत्रशक्तिश्रीपादुकां ,,
४ सौः अस्त्राय फट् । अस्त्रशक्तिश्रीपादुकां ,,

षटकोणे स्वाग्रादिप्रादक्षिण्येन—

ऐं क ५ हृदयाय नमः । हृदयशक्तिश्रीपादुकां पूजयामि नमः ।
४ क्लीं ह ६ शिरसे स्वाहा । शिरः शक्तिश्रीपादुकां ,,
४ सौः स ४ शिखायै वषट् । शिखाशक्तिश्रीपादुकां ,,
४ ऐं क ५ कवचाय हुं । कवचशक्तिश्रीपादुकां ,,
४ क्लीं ह ६ नेत्रत्राय वौषट् । नेत्रशक्तिश्रीपादुकां ,,
४ सौः स ४ अस्त्राय फट् । अस्त्रशक्तिश्रीपादुकां ,,

त्रिकोणस्वाग्रादिप्रादक्षिण्येन—

४ ऐं क ५ नमः । क्लीं ह ६ नमः ४ सौः स ४ नमः ।

४ मूलं नमः (बिन्दौ) ततः ४ अस्त्राय फट्—इति सामान्यार्घ्यं-पात्रस्य आधारं प्रक्षाल्य ।

षोडशसोमकला: यजेत् । तत विशेषार्घ्यामृते स्वाग्रादि-प्रादक्षिण्येन अकथादिषोडशवर्णात्मकं रेखात्रयं त्रिकोण विलिख्य। तदन्त:स्वाग्रादिकोणेषु प्रादक्षिण्येन हं लं क्षं बहिश्च मूलखण्ड त्रयं बिन्दौ सबिन्दुतुर्यस्वरं तद्वामदक्षिणयो: क्रमेण हंस: इति च वर्णौ विलिख्य। हंस: नम: इति मन्त्रेणाराध्यत्रिकोणस्य परितो वृत्तं निष्पाद्य। तद्बहिश्च षट्कोणं निर्माय स्वाग्रादिप्रादक्षिण्येन।

४ क ५ हृदयाय नम:। हृदयशक्तिश्रीपादुकां पूजयामि नम:।
४ ह ६। शिरसे स्वाहा शिर:शक्तिश्रीपादुकां ,,
४ स ४। शिखायै वौषट्। शिखाशक्तिश्रीपादुकां ,,
४ क ५। कवचाय हुं कवचे। कवचशक्तिश्रीपादुकां ,,
४ ह ६। नेत्रत्राय वौषट् नेत्रे। नेत्रशक्तिश्रीपादुकां ,,
४ स ६। अस्त्राय फट्। अस्त्रशक्तिश्रीपादुकां पूजयामि नम:।

इति षडङ्गमन्त्रै: षडङ्गयुवतीरभिपूज्य। ॐ ऐं क्लीं सौं मूलान्ते तां चिन्मयीमानन्दलक्षणाममृतकलशोत्पलहस्तद्वयां प्रसन्नां देवीं पूजयामि नम: स्वाहा।

इति सुधादेवीमभ्यर्च्य तदर्घ्यं किञ्चित्पात्रान्तरेण।

४ वषडित्युद्धृत्य। ४ स्वाहेति निक्षिप्य। ४ हुमित्यवगुंठ्य। ४ वौषडिति धेनुमुद्रयामृतीकृत्य। ४ फडिति संरक्ष्य। ४ नम इति पुष्पं दत्त्वा। गालिनिमुद्रया। ४ मूलेन निरीक्ष्य। योनिमुद्रया नत्वा। ४ मूलेन सप्तवारमभिमन्त्र्य गन्धाक्षतपुष्पधूपदीपान् दत्त्वा विशेषार्घ्या-मृतेनात्मानं पूजोपकरणानि प्रोक्षयेत्। तत: विशेषार्घ्यपात्रं करेण संस्पृश्य मन्त्रैरभिमन्त्रयेत्।

४ यं धूम्रार्चिषे नम:। ४ रं ऊष्मायै नम:। ४ लं ज्वलिन्यै नम:। ४ वं ज्वालिन्यै नम:। ४ शं विस्फुलिंग्यै नम:। ४ षं सुश्रियै नम:। ४ सं सुरूपायै नम:। ४ हं कपिलायै नम:। ४ लं हव्य-वाहायै नम:। ४ क्षं कव्यवाहायै नम:। ४ कं भं तपिन्यै नम:। ४ खं बं तापिन्यै नम:।

४ गं फं धूम्रायै नमः। ४ घं पं मरीच्यै नमः। ४ ङं नं ज्वलिन्यै नमः। ४ चं धं रुच्यै नमः। ४छं दं सुषुम्नायै नमः। ४जं थं भोगदायै नमः। ४ झं तं विल्वायै नमः। ४ ञं णं वोधिन्यै नमः। ४ टं ढं धारिण्यै नमः। ४ ठं डं क्षमायै नमः। ४ अं अमृतायै नमः। ४ आं मानदायै नमः। ४इं पूषायै नमः। ४ईं तुष्ट्यै नमः। ४उं पुष्ट्यै नमः। ४ ऊं रत्यै नमः। ४ ऋं धृत्यै नमः। ४ ॠं शशिन्यै नमः। ४ ऌं भद्रिकायै नमः। ४ॡं कान्त्यै नमः। ४एं ज्योत्स्नायै नमः। ४ऐं श्रियै नमः। ४ ओं प्रीत्यै नमः। ४ औं अङ्गदायै नमः। ४ अं पूर्णायै नमः। ४ अः पूर्णामृतायै नमः। ४ सृष्ट्यै नमः। ४ ऋद्ध्यै नमः। ४ स्मृत्यै नमः। ४ मेध्यायै नमः। ४ कान्त्यै नमः। ४ लक्ष्म्यै नमः। ४ द्युत्यै नमः। ४ स्थिरायै नमः। ४ स्थित्यै नमः। ४ सिद्ध्यै नमः। ४ जनायै नमः। ४ पालिन्यै नमः। ४ शान्त्यै नमः। ४ ईश्वर्यै नमः। ४ रत्यै नमः। ४ कामिकायै नमः। ४ वरदायै नमः। ४ ह्लादिन्यै नमः। ४ प्रीत्यै नमः। ४ दीर्घायै नमः। ४ तीक्ष्णायै नमः। ४ रौद्र्यै नमः। ४ भयायै नमः। ४ निद्रायै नमः। ४ तन्द्र्यै नमः। ४ क्षुधायै नमः। ४ क्रोधिन्यै नमः। ४ क्रियायै नमः। ४ उत्कार्यै नमः। ४ मृत्यवे नमः। ४ पीतायै नमः। ४ श्वातायै नमः। ४ अरुणायै नमः। ४ विध्यायै नमः। ४ शान्त्यै नमः। ४ असितायै नमः। ४ निवृत्त्यै नमः। ४ प्रतिष्ठायै नमः। ४ इंधिकायै नमः। ४ दीपिकायै नमः। ४ रेचिकायै नमः। ४ मोचिकायै नमः। ४ परायै नमः। ४ सूक्ष्मायै नमः। ४ सूक्ष्मामृतायै नमः। ४ ज्ञानायै नमः। ४ ज्ञानामृतायै नमः। ४ आप्यायिन्यै नमः। ४ व्यापिन्यै नमः। ४ व्योमरूपायै नमः। ४ हसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दु रोणसत्। नृषद्वरसदृत सद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं वहत्। ४ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि बिम्बा। ४ त्र्यम्बकं यजामहे सुगन्धि पुष्टि वर्धनम्। उर्वारुकमिव बधनान् मृत्योर्मुक्षीय मामृतात्। ४ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवी वयक्षुराततं

४ तद्विप्रासो विपन्यवोजा गृहवांसः समिद्यते। विष्णोर्यत्पर-मम्पदम्। ४ अं अग्निमण्डलाय धर्मप्रददशकलात्मने श्रीमहात्रिपुर-सुन्दर्याः सामान्यार्घ्यपात्राधाराय नमः। इति मण्डलस्योपरि संस्थाप्य।

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् अस्य यज्ञस्य सुक्रतुम्। रां रीं रुं रैं रौं रः रमल वर यूं अग्निमण्डलाय नमः। इति अग्नि-मण्डलं विभाव्य दशवह्निकलां सम्पूजयेत्।

तद्यथा—४ यं धूम्रार्चिष्कलायै नमः। ४ रं ऊष्माकलायै नमः। ४लं ज्वलिनीकलायै नमः। ४ वं ज्वालिनी०। ४ शं विस्फुलिङ्गिनी०। ४ षं सुजी०। ४ सं सुमवा०। ४ हुं कपिला०। ४ लं हव्यवाहिनी०। ४ क्षं कव्यवाहिनी०। ४ अस्त्राय फट्। इति क्षालितं शङ्खं गृहीत्वा—४ उं सूर्यमण्डलायार्घप्रदद्वादशकलात्मने श्रीमहात्रिपुरसुन्दर्याः सामा-न्यार्घ्यपात्राय नमः, इति संस्थाप्य।

४ आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्। ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः। हमलवरयूम्, सूर्यमण्डलाय नमः। इति सूर्यमण्डलं विभाव्य द्वादश-सूर्यकलाः सम्पूजयेत्।

तद्यथा—४ कं चं तापिनीकलायै नमः। ४ खं वं तापिनी०। ४ गं फं धूम्रा०। ४ घं पं मरीचि०। ङं नं ज्वालिनी०। ४ चं धं रुचि०। ४ छं दं सुषुम्नाकला०। ४ जं यं भोगदा०। ४ अं तं विस्वा०। ४ ञं तं बोधिनी०। ४ ढं ठं धारिणी०। ४ ठं डं क्षमा०। ४ मं सोममण्डलाय कामप्रदषोडशकलात्मने महात्रिपुरसुन्दर्याः सामान्यार्घ्यामृताय नमः। इति वर्धनीसलिलमापूर्य क्षीरविन्दुं दत्वा।

४ आप्यायस्य समेतु ते विन्यतः सोमवृष्णियं भवावाजस्य संगथे। सां सीं सूं सैं सौं सः समलवरयूं सोममण्डलाय नमः। इति सोममण्डलं विभाव्य षोडशसोमकलाः सम्पूजयेत्।

तद्यथा—४ अं अमृताकलायै नमः। ४ आं मानदा०। ४ इं पूषा०। ४ ईं तुष्टि०। उं पुष्टि०। ऊं रति०। ४ ऋं धृति०।

४ ॠं शशिनी०। ४ ऌं चन्द्रिका०। ४ ॡं कान्ति०। ४ एं ज्योत्स्ना०। ४ ऐं श्री०। ४ ओं प्रीति०। ४ औं अङ्गदा०। ४ अं पूर्णा०। ४ सः पूर्णामृताकलायै नमः।

ततस्तस्मिन् शङ्खे अग्नीशासुरवायुकोणेषु मध्ये दिक्षु च क्रमेण षडङ्गैः सम्पूज्य, अस्त्राय फट्। इति संरक्ष्य, कवचाय हुं इति अवगुण्ठ्य, धेनुयोनिमुद्रे प्रदर्श्य, मूलेन सप्तवारमभिमन्त्र्य तत्सलिलपृषतैः पूजोपकरणानि आत्मानं च प्रोक्ष्य, शङ्खजलात् किञ्चित् वर्धन्यां क्षिपेत्।

विशेषार्घ्यविधिः। सामान्यार्घ्योदकेन तद्दक्षिणतः विन्दुत्रिकोणषट्कोणवृत्तचतुरस्रात्मकं मण्डलं परिकल्प्य बिन्दौ सानुस्वारं तुरीयस्वरमालिख्य चतुरस्रे प्राग्वत्षडङ्गं विन्यस्य। कूटत्रयेण त्रिकोणान्यभ्यर्च्य। पुरोभागादिप्रादक्षिण्येन कूटत्रयद्विरावृत्त्या षट्कोणकोणांश्च क्रमेण कुसुमादिभिरभ्यर्च्य। तत्र मण्डले—३ ऐं अग्निमण्डलाय दशकलात्मने अर्घपात्राधाराय नमः। इत्यादिदश-अग्निकलाः सम्पूज्य। तदुपरि स्वर्णादि-निर्मितपात्रम्। ४ क्लीं सूर्यमण्डलाय द्वादशकलात्मने अर्घ्यपात्राय नमः। इति मन्त्रेण निधाय तत्र। ४ ह्रीं ऐं महालक्ष्मीश्वरी परमस्याभिन्यूर्ध्वशून्यप्रवाहिणीसोमसूर्याग्निभक्षिणी परमप्रकाशभासुरे आगच्छ आगच्छ विश विश पात्रं प्रतिगृह्ण प्रतिगृह्ण हुं फट् स्वाहा। इति पुष्पाञ्जलिं विकीर्य प्रागुक्तं कं भं तपिन्यै नमः। इत्यादि द्वादशसूर्यकलाः सम्भाव्य, तत्र।

४ सौः सोममण्डलाय षोडशकलात्मने अर्घ्यामृताय नमः। इति मन्त्रेण कलशगतं कस्तूरिकाद्यधिवासितं क्षीरमभिपूर्य तत्र सुरभिफलं कुसुममार्द्रकशकलं च निक्षिप्य प्रागुक्तं अं अमृतायै नमः इत्यादि-षोडशसोमकलाः यजेत्। तत्र विशेषार्घ्यामृते स्वाग्रादिप्रादक्षिण्येन अकथादि-षोडशवर्णात्मकं रेखात्रयं त्रिकोणं विलिख्य, तदन्तः स्वाग्रादिकोणेषु प्रादक्षिण्येन हं लं क्षं बहिश्च मूलखण्डत्रयं बिन्दौ सबिन्दुतुर्यस्वरं तद्वामतक्षयोः क्रमेण हं सः इति च वर्णौ

विलिख्य। ३ हुं सः नमः, इति मन्त्रेणाराध्य, त्रिकोणस्य परितो वृत्तं निष्पाद्य। तद्बहिश्च षट्कोणं निर्माय स्वाग्रादिप्रादक्षिण्येन। ३ क ५ हृदयाय नमः, हृदयशक्तिश्रीपादुकां पूजयामि। ३ ह ६ शिरसे स्वाहा शिरःशक्तिश्रीपादु०। ३ स ४ शिखायै वषट् शिखाशक्तिश्रीपादु०। ३ क ५ कवचाय हुं कवचशक्तिश्रीपा०। ३ ह ६ नेत्रत्रयाय वौषट्। नेत्रशक्तिश्रीपादु०। ३ स ४ अस्त्राय फट् अस्त्रशक्तिश्रीपादु०। इति षडङ्गमन्त्रैः षडङ्गयुवतीरभिपूज्य। ३ मूलान्ते तां चिन्मयीमानन्दलक्षणाममृतकलशोत्पलहस्तद्वयां प्रसन्नां देवीं पूजयामि नमः स्वाहा। इति सुधादेवीमभ्यर्च्य तदर्घ्यं किञ्चित्पात्रान्तरेण ३ वषडित्युद्धृत्य। ३ स्वाहेति निक्षिप्य। ३ हुमित्यवगुण्ठ्य। ३ वौषडिति धेनुमुद्रयामृतीकृत्य। ३ फडिति संरक्ष्य। ३ नम इति पुष्पं दत्त्वा। ३ गालिनीमुद्रया। ३ मूलेव निरीक्ष्य। योनिमुद्रया नत्वा। ३ मूलेन सप्तवारमभिमन्त्र्य गन्धाक्षत-पुष्प-धूप-दीपान् दत्त्वा विशेषार्घ्यामृतेनात्मानं पूजोपकरणानि प्रोक्षयेत्। ततः विशेषार्घ्यपात्रं करेण संस्पृश्य मन्त्रैरभिमन्त्रयेत्।

मन्त्रांश्च—३ यं धूम्रार्चिषे नमः। ३ रं ऊष्मायै नमः। ३ लं ज्वलिन्यै नमः। ३ वं ज्वालिन्यै नमः। ३ शं वि स्फुलिङ्ग्यै नमः। ३ षं सुश्रियै नमः। ३ सं सुरूपायै नमः। ३ हं कपिलायै नमः। ३ ळं हव्यवाहायै नमः। ३ क्षं कव्यवाहायै नमः। ३ कं भं तपिन्यै नमः। ३ खं बं तापिन्यै नमः। गं फं धूम्रायै नमः। ३ घं पं मारीच्यै नमः। ३ ङं नं ज्वालिन्यै नमः। ३ चं धं रुच्यै नमः। ३ छं दं सुषुम्नायै नमः। ३ जं थं भोगदायै नमः। ३ क्षं तं विश्वायै नमः। ३ ञं णं वोधिन्यै नमः। ३ टं ठं धारिण्यै नमः। ३ ठं डं क्षमायै नमः। ३ अं अमृतायै नमः। ३ आं मानदायै नमः। ३ इं पूषायै नमः। ३ ईं तुष्ट्यै नमः। ३ उं पुष्ट्यै नमः। ३ ऊं रत्यै नमः। ३ ऋं धृत्यै नमः। ३ ॠं शशिन्यै नमः। ३ ऌं चन्द्रिकायै नमः। ३ ॡं कान्त्यै नमः। ३ एं ज्योत्स्नायै नमः। ३ ऐं श्रियै नमः।

३ ओं प्रीत्यै नमः। ३ ओं अङ्गदायै नमः। ३ अं पूर्णायै नमः। ३ अः पूर्णामृतायै नमः। ३ सृष्ट्यै नमः। ३ ऋद्ध्यै नमः। ३ स्मृत्यै नमः। ३ मेधायै नमः। ३ कान्त्यै नमः। ३ लक्ष्म्यै नमः। ३ द्युत्यै नमः। ३ स्थिरायै नमः। ३ स्थित्यै नमः। ३ सिद्ध्यै नमः। ३ जनायै नमः। ३ पालिन्यै नमः। ३ शान्त्यै नमः। ३ ईश्वर्यै नमः। ३ रत्यै नमः। ३ कामिकायै नमः। ३ वरदायै नमः। ३ ह्लादिन्यै नमः। ३ प्रीत्यै नमः। ३ दीर्घायै नमः। ३ तीक्ष्णायै नमः। ३ रौद्र्यै नमः। ३ भयायै नमः। ३ निद्रायै नमः। ३ तन्द्र्यै नमः। ३ क्षुधायै नमः। ३ क्रोधिन्यै नमः। ३ क्रियायै नमः। ३ उत्कार्यै नमः। ३ मृत्यवे नमः। ३ पीतायै नमः। ३ श्वेतायै नमः। ३ अरुणायै नमः। ३ असितायै नमः। ३ निवृत्त्यै नमः। ३ प्रतिष्ठायै नमः। ३ विद्यायै नमः। ३ शान्त्यै नमः। ३ इन्धिकायै नमः। ३ दीपिकायै नमः। ३ रेचिकायै नमः। ३ मोचिकायै नमः। ३ परायै नमः। ३ सूक्ष्मायै नमः। ३ सूक्ष्मामृतायै नमः। ३ ज्ञानायै नमः। ३ ज्ञानामृतायै नमः। ३ आप्यायिन्यै नमः। व्यापिन्यै नमः। ३ व्योमरूपायै नमः। ३ हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदातिथिर्दुरोणसत्। नृषद्वरसदृत सद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं वहत्। ३ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरोगिरिष्ठाः। ३ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा। ३ त्र्यम्बकं यजामहे सुगन्धि पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्। ३ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। ३ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। ३ विष्णोर्यत्परमं पदम्। ३ विष्णोर्योनिं कल्पयतु त्वष्टारूपाणि पिंशतु। आसिंचतु प्रजापतिर्धातागर्भं दधातु ते।

गर्भं धेहि सिनी वालि गर्भं देहि सरस्वति।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा॥

३ अखण्डैकरसानन्दपरे परसुधात्मनि। स्वच्छन्दस्फुरणामत्र निधेहय-कुलनायिके॥ ३ अकुलस्थामृताकारे शुद्धज्ञानकरे परे। अमृतं त्वं

निधेह्यस्मिन्वस्तुनि क्लिन्नरूपिणि ॥ ३ तद्रूपिण्यै करस्थत्वं कृत्वा ह्येतत्स्वरूपिणी । भूत्वा परामृताकारा मयि चित्स्फुरणं कुरु ॥ ३ ऐं ब्लूं स्रौं जूं सः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा । ३ ऐं वद वद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय महाक्षोभं कुरु कुरु ह्सौं स्हौं: । इत्येतैर्मन्त्रैरभिमन्त्र-यित्वा । तद्विशेषार्घ्यामृतात्पात्रान्तरे किञ्चिदुद्धृत्य तद्बिन्दुभिस्त्रिवारं श्रीगुरुपादुकामन्त्रेण शिरसि गुरुं यजेत् । संनिहिताय तु पुजापुरःसरं निवेदयेत् । स्वयं च शरीरशुद्धयर्थं देवीभावं स्वात्मानं भावयन् मूलेन आत्मनः कुण्डलिनीरूपे चिदग्नौ होमबुद्धया जुहुयात् । विशेषार्घ्य-पात्रात्किञ्चित्क्षीरकलशे निक्षिपेत् । अविसर्जनं शंसं विशेषार्घ्यपात्रं न चालयेत् । इदमर्घ्यपात्रद्वय सूक्तरीत्या श्रीक्रमे नान्यत् । इति विशेषार्घ्यस्थापनविधिः ।

अथ पूजा । स्वशिरसि कुसुमगर्भितेऽञ्जलिना त्रिखण्डमुद्रया । ३ ह्रीं श्रीं सौः श्रीललितायाः अमृतचैतन्यमूर्तिं कल्पयामि नमः । इति मन्त्रमुच्चारयन् निजलीलाङ्गीकृतललितवपुषं विचिन्त्य । ३ ह्सैं ह्स्क्लीं ह्स्रौः महापद्मवनान्तस्थे कारणानन्दविग्रहे । सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥ इति मन्त्रेण बिन्दुपीठगतनिर्विशेषब्रह्मात्मक-श्रीकामेश्वराङ्के परदेवतामावाहयेत् ।

ततः मूलेन ३ श्रीललिते आवाहिता भव । ३ संस्थापिता भव । ३ सन्निहिता भव । ३ सन्निरुद्धा भव । ३ सम्मुखीकृता भव । ३ अव-गुण्ठिता भव । ३ षडङ्गमन्त्रमुच्चार्य । ३ संकलीकृता भव । ३ धेनु-मुद्रया देवीमूर्ध्नि । ३ अमृतीकृता भव । ३ परमीकृता भव । ३ प्रार्थिता भव । ३ वन्दनयोनिमुद्रे प्रदर्शयेत् । मूलान्ते श्रीललिता-त्रिपुरसुन्दरीं तर्पयामि नमः । इति त्रिः सामान्यजलेन सन्तर्प्य । तेनैव जलेन पाद्याद्युपचारान्निवेदयेत् । ३ श्रीललितायै नमः पाद्यं कल्पयामि । ३ श्रीललिता० अर्घ्यं० । ३ श्रीललि० आचमनी० । ३ श्रीललि० सुगन्धतैलाभ्यङ्गं परि० । ३ श्रीललि० उष्णोदकस्नानं प० । ३ श्री-

ललि० पञ्चामृतं० । श्रीललि० महाभिषेकं परिकल्पयामि । इह श्रीसूक्तरुद्रादीनामभिषेकः । श्रीललि० वस्त्रं० । ३ श्रीललि० कञ्चुकीं० । ३ श्रीललि० मङ्गलसूत्रादिस्वर्णाभरणं० । ३ श्रीललि० हरिद्राकुङ्कुमं प० । ३ श्रीललि० गन्धं० । ३ श्रीललि० अक्षता० । ३ श्रीललि० पुष्पाणि परि० । ३ श्रीललिता० किरीटकुण्डलं० । ३ श्रील० दीपं प० । ३ श्रीललि० मूलेन नैवेद्यं० । ३ श्रीललि० ताम्बूलं० । ३ श्रीललि० मङ्गलनीराजनं दीपं० । ३ श्रीललि० मन्त्रपुष्पां० ।

ततः संक्षोभिण्यादि-नवमुद्राः बाणादिचतुरायुधमुद्राः प्रदर्श्य । मूलेन विशेषार्घ्यामृतेन देवीं त्रिः सन्तर्प्य, सम्पूज्य योनिमुद्रया प्रणमेत् ।

संविन्मये परे देवि परामृतचरुप्रिये ।
अनुज्ञां त्रिपुरे देहि परिवारार्चनाय मे ॥

श्रीचक्रस्य मध्यत्रिकोणे वामावर्तेन । ३ कामेश्वरी नित्या श्रीपादुकां पूजयामि तर्पयामि नमः । ३ भगमालिनी नित्या श्री० । ३ नित्यक्लिन्ना नित्या श्री० । ३ भेरुण्डा नित्याश्री० । ३ वह्निवासिनी नित्या श्रीपा० । ३ महावज्रेश्वरी नित्या श्री० । ३ शिवदूती नित्या श्री० । ३ त्वरिता नित्या श्री० । ३ कुलसुन्दरी नित्या श्रीपा० । ३ नित्यानित्याश्री० । ३ नीलपताकिनी नित्याश्री० । ३ विजया नित्याश्री० । ३ सर्वमङ्गला नित्याश्रीपा० । ३ ज्वालामालिनी नित्या श्री० । ३ चित्रानित्या श्री० । ततः मूलत्रिकोणान्तभागेषु । ३ परमप्रकाशानन्दनाथश्री० । ३ परमशिवानन्दनाथश्री० । ३ पराशक्त्यम्बा श्री० । ३ कालेश्वरानन्दनाथ श्री० । ३ शुक्लदेव्यम्बाश्री० । ३ कुलेश्वरानन्दनाथश्री० । ३ कामेश्वर्यम्बाश्री० । इति दिव्योऽर्घः । ३ भोगानन्दनाथश्री० । ३ क्लिन्नानन्दनाथश्री० । ३ समयानन्दनाथश्री० । ३ सहजानन्दनाथश्री० । इति सिद्धार्घः । ३ गगनानन्दनाथश्री० । ३ विश्वानन्दनाथश्री० । ३ विमलानन्दनाथश्री० । ३ मदनानन्दनाथश्री० । ३ भुवनानन्दनाथश्री० । ३ लीला-

नन्दनाथश्री० । ३ स्वत्वानन्दनाथश्री० । ३ प्रियानन्दनाथश्री० । इति मानवोऽर्घः । स्वशिरसि गुरुं त्रिर्यजेत् ।

अथ नवावरणपूजामारभेत् । चतुरस्रप्रथमरेखायाम् । ३ अणिमासिद्धिश्रीपादुकां पूजयामि तर्प० । ३ लघिमासिद्धिश्री० । ३ महिमासिद्धिश्री० । ३ ईशत्वसिद्धिश्री० । ३ वशत्वसिद्धिश्री० । ३ प्राकाम्यसिद्धिश्री० । ३ भुक्तिसिद्धिश्री० । ३ इच्छासिद्धिश्री० । ३ प्राप्तिसिद्धिश्री० । ३ सर्वकामसिद्धिश्री० । मध्यरेखायाम् । ३ ब्रह्मा श्री० । ३ माहेश्वरीश्री० । ३ कौमारीश्री० । ३ वैष्णवीश्री० । ३ वाराहीश्री० । ३ इन्द्राणीश्री० । ३ चामुण्डाश्री० । ३ महालक्ष्मीश्री० । ३ अन्त्यरेखायाम् । ३ द्रां संक्षोभिणीमुद्राश्रीपा० । ३ क्लीं सर्वाकर्षिणीश्री० । ३ ब्लूं सर्ववशङ्करीश्री० । ३ सः सर्वोन्मादिनीमुद्राश्रीपा० । ३ ह्सौं सर्वबीजमुद्राश्री० । ३ मूलेन त्रिवारं सम्पूज्य सन्तर्प्य । एताः प्रकटयोगिन्यः । त्रैलोक्यमोहनचक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः सम्पूजिताः सन्तु । ३ इति पुष्पाञ्जलिं दत्वा । ३ द्रां संक्षोभिणीमुद्रां प्रदर्शयेत् ।

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ! ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

षोडशदले देव्यग्रदलमारभ्य । ३ कामाकर्षिणीश्री० । ३ बुद्ध्याकर्षिणीश्री० । ३ अहङ्कारकर्षिणीश्री० । ३ शब्दाकर्षिणीश्री० । स्पर्शाकर्षिणीश्री० । ३ रूपाकर्षिणीश्री० । ३ रसाकर्षिणीश्री० । गन्धाकर्षिणीश्री० । ३ चित्ताकर्षिणीश्री० । ३ धैर्याकर्षिणीश्री० । ३ स्मृत्याकर्षिणीश्री० । ३ नामाकर्षिणीश्री० । ३ बीजाकर्षिणीश्री० । ३ आत्माकर्षिणीश्री० । ३ अमृताकर्षिणीश्री० । ३ शरीराकर्षिणीश्री० । ३ मूलेन त्रिवारं सम्पूज्य सन्तर्प्य एताः गुप्तयोगिन्यः सर्वाशापरिपूरकचक्रे समुद्राः० सन्तु । ३ द्रीं सर्वविद्राविणीमुद्रां प्रदर्शयेत् । 'अभीष्ट० द्वितीयावरणार्चनम्' ।

देव्या अष्टदले । ३ अनङ्गाकुसुमाश्री० । ३ अनङ्गामेखलाश्री० । ३ अनङ्गमदनाश्री० । ३ अनङ्गमदनातुराश्री० । ३ अनङ्गरेखाश्री० । ३ अनङ्गावेगिनीश्री० । ३ अनङ्गाङ्कुशाश्री० । ३ अनङ्गमालिनीश्री० । ३ मूलेन त्रिवारं सम्पूज्य सन्तर्प्य । एताः गुप्ततरयोगिन्यः सर्वसंक्षोभणचक्रे समुद्राः० सन्तु । क्लीं सर्वाकर्षिणीमुद्रां प्रदर्शयेत् । 'अभीष्ट० तृतीयावरणार्चनम्' ।

देव्याश्चतुर्दशारे देव्यग्रकोणमारभ्य वामावर्तेन । ३ सर्वसंक्षोभिणी-श्री० । ३ सर्वविद्राविणी श्री० । ३ सर्वाकर्षिणी श्री० । ३ सर्वाह्लादिनी श्री० । ३ सर्वसंमोहिनीश्री० । ३ सर्वस्तम्भिनीश्री० । ३ सर्व-जृम्भिणीश्री० । सर्ववशङ्करीश्री० । ३ सर्वरञ्जिनीश्री० । ३ सर्वोन्मादिनीश्री० । ३ सर्वार्थसाधिनीश्री० । ३ सर्वसम्पत्तिपूरिणीश्री० । ३ सर्वमन्त्रमयीश्री० । ३ सर्वद्वन्द्वक्षयङ्करीश्री० । ३ मूलेन त्रिः । एताः सम्प्रदाययोगिन्यः सर्वसौभाग्यदायकचक्रे समु० सन्तु । ३ ब्लूं सर्ववशङ्करीमुद्रां प्रदर्शयेत् । 'अभीष्ट० चतुर्थावरणार्चनम् ।'

देवीबहिर्दशारे । ३ सर्वसिद्धिप्रदाश्री० । ३ सर्वसम्पत्प्रदाश्री० । ३ सर्वप्रियङ्करीश्री० । ३ सर्वमङ्गलकारिणीश्री० । ३ सर्वकामप्रदा श्री० । ३ सर्वदुःखविमोचिनी श्री० । ३ सर्वमृत्युप्रशमनीश्री० । ३ सर्वविघ्ननिवारिणी श्री० । ३ सर्वाङ्गसुन्दरीश्रीपा० । ३ सर्व-सौभाग्यदायिनीश्री० । मूलेन त्रिः । एताः कुलोत्तीर्णयोगिन्यः सर्वार्थ-साधकचक्रे समु० सन्तु । ३ सः सर्वोन्मादिनीमुद्रां प्रदर्शयेत् । 'अभीष्ट० पञ्चमावरणार्चनम् ।'

अन्तर्दशारे देव्यग्रकोणमारम्य वामावर्तेन । ३ सर्वज्ञाश्री० । ३ सर्वशक्तिश्री० । ३ सर्वैश्वर्यप्रदायिनीश्री० । ३ सर्वज्ञानमयीश्री० । ३ सर्वव्याधिविनाशिनीश्री० । ३ सर्वाधारस्वरूपाश्री० । ३ सर्वपाप-हराश्री० । ३ सर्वानन्दमयीश्री० । सर्वरक्षास्वरूपिणी श्री० । ३ सर्वे-प्सितफलप्रदाश्री० । ३ मूलेन त्रिः । एताः गुप्तयोगिन्यः सर्वरक्षाकर-चक्रे समु० सन्तु । क्रों सर्वमहाङ्कुशमुद्रां प्रदर्शयेत् । 'अभीष्ट० षष्ठा-वरणार्चनम् ।'

अष्टारे । ३ वशिनीवाग्देवताश्री० । ३ कामेश्वरीवा० श्री० । ३ मोदिनीवा० श्री० । ३ विमलावाग्देवता० श्री० । ३ अरुणावाग्देवता श्री० । ३ जयिनीवाग्देवता०श्री० । ३ सर्वेश्वरी वा०श्री० । ३ कौलिनी-वाग्दे० श्री० । ३ मूलेन त्रिः । एताः रहस्ययोगिन्यः सर्वरोगहरचक्रे समुद्रा० सन्तु । ३ ह्स्ख्फ्रें खेचरीमुद्रां प्रदर्शयेत् । 'अभीष्ट० सप्तमा-दरणार्चनम् ।'

देव्याः चतुर्दिक्षु । ३ द्रां द्रीं क्लीं ब्लूं सः सर्वजृम्भणबाणेभ्यो नमः । ३ यं सर्वसम्मोहनाय धनुषे नमः । ३ ह्रीं सर्ववशीकरणाय पाशाय नमः । ३ क्रों सर्वस्तम्भनायाङ्कुशाय नमः त्रिकोणे । ३ मूल-प्रथमखण्डं कामेश्वरीश्रीपा० । ३ मूलद्वितीयखण्डं वज्रेश्वरी श्री० । ३ मूलतृतीयखण्डं भगमालिनीश्री० । विन्दौ मूलेन त्रिः । एताः अति-रहस्ययोगिन्यः सर्वसिद्धिप्रदचक्रे समु० सन्तु० । ३ ह्सौं सर्वबीजमुद्रां प्रदर्शयेत् । 'अभीष्ट० अष्टमावरणार्चनम् ।'

विन्दौ । मूलं श्रीललिताम्बा श्री मूलेन त्रिः । एषापरापररहस्य-योगिनी सर्वानन्दमयचक्रे समुद्रा ससिद्धिः सायुधा सशक्तिः सवाहना सपरिवारा सर्वोपचारैः सम्पूजितास्तु । ३ ऐं महायोनिमुद्रां प्रदर्शयेत् । 'अभीष्ट० नवमावरणार्चनम् ।'

पुनः देव्यै मूलेन धूपदीपादिकं दत्वा महानैवेद्यं समर्पयेत् । ततः कुलदीपः ।

अन्तस्तेजो वहिस्तेज एकीकृत्यामितप्रभम् ।
त्रिधा दीपं परिभ्राम्य कुलदीपं निवेदयेत् ॥

इति जानुचुम्बितभूतलः सन् । जयध्वनिमन्त्र मातः स्वाहा । इति घण्टां सम्पूज्य वामकरेण वादयन् देव्यै कुलदीपेन आरार्तिकं कृत्वा । ततः मन्त्रपुष्पम् ।

शिवे शशिसुशीतलामृततरङ्गगन्धोल्लस-
न्नवावरणदेवते नवनवामृतस्पन्दिनि ।
गुरुक्रमपुरस्कृते गुणशरीरनित्योज्ज्वले
षडङ्गपरिवारिते फलित एष पुष्पाञ्जलिः ॥

इति पुष्पाञ्जलिं दत्वा ।

अथ बलिः

देव्या दक्षभागे त्रिकोणवृत्तचतुरस्रमण्डलं निमार्य । '३ ऐं व्यापकमण्डलाय नमः' इति सम्पूज्य । तत्र पात्रत्रयं चर्वणं च संस्थाप्य । ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं स्वाहा । इति मन्त्रं त्रिः पठित्वा दक्षकरार्पितं वामकरतत्त्वमुद्रास्पृष्टं सलिलवल्युपरि दत्वा वामपार्ष्णिभूतलाघातकरस्फोटौ कुर्वाणः समुदञ्चितवक्त्रः बाणमुद्रया बलिं भूतैः ग्राहितं विभाव्य प्रणमेत् । ततः यथाशक्ति मूलं जप्त्वा योनिमुद्रया प्रणमेत् । ततः सहस्रनामादिस्तोत्रं पठेत् ।

अथ सुवासिनीपूजा

अदीक्षिता शक्तिरस्ति चेत् प्रथमतः तस्याः शोधनं कार्यम् । शोधनविधिः । ऐं क्लीं सौः त्रिपुरायै नमः । इमां शक्तिं पवित्रां कुरु कुरु मम शक्तिं कुरु कुरु स्वाहा । इति अभिषेकमन्त्रेण त्रिरावृत्तिसामान्यसलिलेन शक्तिं प्रोक्ष्य ।

ॐ शान्तिरस्तु शिवं चाऽस्तु प्रणश्यत्वशुभं च यत् ।
एत एवागतं पापं तत्रैव प्रतिगच्छतु ॥

इत्युच्चार्य तस्याः कर्णे हृल्लेखां जपेत् । इति । अथ सुवासिन्याः पादद्वयं स्पृष्ट्वा प्रणम्य पञ्चमुद्राः प्रदर्शयित्वा बालामन्त्रेण षोडशोपचारैः पूजयेत् । ततः—

अलिपात्रमिदं तुभ्यं दीयते पिशितान्वितम् । स्वीकृत्य ।

वत्स ! तुभ्यं मया दत्तं पीतशेषं कुलामृतम् ।
त्वच्छत्रून्संहरिष्यामि सर्वाभीष्टं ददामि ते ॥

इति प्रदद्यात् । अथ सन्निहिते गुरौ ते पादुकामन्त्रेणाभिपूज्य पात्राणि समर्पयेत् । ततः सर्वैः सह श्रीनाथादि० । समस्तप्रकटगुप्त-गुप्ततरसम्प्रदायकुलकौलिनिगर्भरहस्यातिरहस्यपरापररहस्ययोगिनी-चक्रश्रीपादुकाभ्यो नमः । इति समष्टिमन्त्रेण श्रीचक्रे पुष्पाञ्जलिं दद्यात् ।

ततः यथाविधिपूर्वकं पात्राणि स्वीकुर्यात् । ततः सामान्योदकेन ।

साधु वाऽसाधु वा कर्म यद्यदाचरितं मया ।
तत्सर्वं कृपया देवि ! गृहाणाराधनं मम ॥

देवीवामहस्ते पूजां समर्पयेत् । ततः मूलेन शंखमुद्धृत्य चक्रोपरि त्रिवारं भ्रामयित्वा प्रोक्षयेत् ।

ज्ञानतोऽज्ञानतो वाऽपि यद्यदाचरितं शिवे ।
तव कृत्यमिति ज्ञात्वा क्षमस्व परमेश्वरि ॥

इति प्रार्थ्य ।

गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि ।
यत्र ब्रह्मादयो देवा न विदुः परमं पदम् ॥

निर्वाणमुद्रया देवीं स्वहृदि स्थापयेत् । ततः—

सम्पूजकानां परिपालकानां जितेन्द्रियाणां च तपोधनानाम् ।
देशस्य राष्ट्रस्य कुलस्य राज्ञः करोतु शान्तिं भगवान् कुलेशः ॥१॥

नन्दन्तु साधककुलान्यणिमादिसिद्ध्या
शापाः पतन्तु समयद्विषयोगिनीनाम्

सा शाम्भवी स्फुरतु काऽपि ममाप्यवस्था ।
यस्यां गुरोश्चरणपङ्कजमेव लभ्यम् ॥ २ ॥
शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्बसंयुतम् ।
कालाग्न्यादि-शिवान्तं च जगद्यज्ञेन तृप्यतु ॥ ३ ॥

इति शान्तिश्लोकान् पठित्वा । विशेषार्घ्यपात्रम् आमस्तकपर्यन्तमुद्धृत्य । तत्क्षीरं पात्रान्तरेणादाय, आर्द्रं ज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति ब्रह्माऽहमस्मि अहमस्मि ब्रह्माहमस्मि अहमेवाहं जुहोमि स्वाहा । इत्यात्मकुण्डलिन्यग्नौ हुत्वा शेषं प्रियशिष्याय दद्यात् । ततः यथाशक्ति ब्राह्मणसुवासिनीश्च भोजयित्वा स्वयमपि भुञ्जीत ।

इति त्रिपुरसुन्दरीपूजापद्धतिः समाप्ता ।

—०—

अथ कौलिकोपचारः

चक्राधीशं गुरुं नत्वा तथा शक्तिपदाम्बुजम् ।
चक्रपूजामथो वक्ष्ये कौलिकानां सुखावहम् ॥ १ ॥
एकान्ते निर्जने स्थाने गङ्गायां च शिवालये ।
स्वगृहे गुरुगेहे वा तथा च गहने वने ॥ २ ॥
विरच्य विपुलं चक्रं देवताप्रीतिकारकम् ।
गुर्वर्थं देवतार्थं च शक्त्यर्थं च कुलेश्वरि ॥ ३ ॥
वितस्तिप्रोन्नतं भद्रे आसनत्रयमादिशेत् ।

ततो वीराणां पंक्तिक्रमेण आसनानि आस्तीर्य ।

गुरुः वा आचार्यः शुद्धवेशाम्बरधरो भूत्वा यज्ञस्थानमागत्य । ॐ द्वारदेवेभ्यो नमः । इत्यनेन द्वारं सम्पूज्य ।

'अपसर्पन्तु ते भूता' इत्याचार्यस्तालत्रयं दत्वा । पुनः ।

नीलं तुरङ्गमधिरुह्य पुरः प्रयान्ती
नीलांशुकाभरणमाल्यविलेपनाय ।
निद्रापुटेन भुवनानि तिरोदधाना
खड्गायुधा भगवती परिपातु भक्तान् ॥ १ ॥

इति पठित्वा, अक्षतानि विकीर्य प्रविशेत् । ॐ कूं कूर्मासनाय नमः । इत्यासनं सम्पूज्योपविश्य, स्वेष्टदेवपूजामारभेत् । ततः भूतशुद्धिप्राणायामं कृत्वा षडङ्गादिकरन्यासांश्च विधाय । तत्र स्वदक्षिणभागे गन्धपुष्पाक्षतादि-पञ्चमकारात्मकसर्वाणि चैतानि संस्थाप्य । अथ संविदं यथामन्त्रं स्वीकुर्यात् ।

संविदासवयोर्मध्ये संविदेव गरीयसी ।
संवित्प्रयोगस्तेनेह पूजादौ साधकोत्तमैः ॥
कर्तव्या च महापूजा करणीया सुनिश्चितैः ।

इति वचनात्तत्र पूजादौ विजयास्वीकारावश्यकत्वमस्ति ।

अथ शोधनम्

ॐ संविदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदाऽनघे ।
भैरवानां च तृप्त्यर्थं पवित्रा भव सर्वदा ॥

ॐ ब्राह्मण्यै नमः स्वाहा ।

ॐ सिद्धमूलिक्रिये देवि हीनबोधप्रबोधिनि ।
राजप्रजावशंकारि शत्रुपक्षनिषूदिनि ॥

ॐ ऐं क्षत्रियायै नमः स्वाहा ।

ॐ अज्ञाने ज्वलदीप्ताग्ने ज्ञानाग्निब्रह्मरूपिणि ।
आनन्दस्याहुतिं प्रीतिं सम्यग्ज्ञानं प्रयच्छ मे ॥

ऐं वैश्यायै नमः स्वाहा । ॐ नमः स्यामि नमः स्यामि योगमार्गप्रदर्शिनि । त्रैलोक्यविजये मातः समाधिफलदा भव । क्लीं शूद्रायै नमः स्वाहा । इत्यभिमन्त्र्य । ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृताकर्षयापकर्षय सिद्धिं देहि सर्वं मे वशमानय स्वाहा ।

द्विठान्तोऽयं मनुः प्रोक्तः सर्वेषामेव शोधने ।
मूलमन्त्रं सप्तवारं तस्योपरि नियोजयेत् ॥
आवाहनादिमुद्रांश्च धेनुयोनिं ततः परम् ।
दिग्बन्धनं छोटिकाभिस्तालत्रयपुरःसरम् ॥
सप्तधा तर्पयेद् ब्रह्मरन्ध्रे मूलं जपेन्मनुम् ।
गुरुं पद्मसहस्रारे तथा सङ्केतमुद्रया ॥

ॐ ऐं वद वद वाग्वादिनि मम जिह्वाग्रे स्थिरीभव सर्वजनं मे वशमानय स्वाहा । इति मन्त्रेण जुहुयान्मुखे । ततो ध्यानम् ।

ज्ञानध्यानप्रबोधिनी-कविकला-कल्लोलकोलादिकम् ।
गीतं वादविनोदमानदकरी सर्वेप्सितादायिनी ॥
दुरितं कल्मषनाशिनी भयहरी रोगस्य विध्वंसिनी ।
सा विजया परमेश्वरी भगवती वन्दे सदा शाङ्करी ॥ २ ॥

एवं संविदानन्दमयो भूत्वा स्वेष्टदेवं ततोऽर्चयेत् । स्ववामभागे त्रिकोणवृत्तचतुरस्रमण्डलं कृत्वा । तत्र ॐ आधारशक्तये नमः । ॐ कूर्माय नमः । ॐ अनन्ताय नमः । ॐ पृथिव्यै नमः । इति सम्पूज्य । तत्र फडिति मन्त्रेण आधारं प्रक्षाल्य संस्थाप्य, मं वह्निमण्डलाय दश-

कलात्मने नमः। इत्याधारं सम्पूज्य। तदुपरि 'अस्त्राय फट्' इति मन्त्रेण शङ्खं प्रक्षाल्य, संस्थाप्य, अं अर्कमण्डलाय द्वादशकलात्मने नमः। इति सम्पूज्य। ततः मूलेन शुद्धोदकेनापूर्य्य। ॐ सोममण्डलाय षोडशकलात्मने नमः। इति सम्पूज्य।

'गङ्गे च यमुने चैव' इति पठेत्। तीर्थान्यावाह्य धेनु-योनिमत्स्य-मुद्रां प्रदर्श्य। इति सामान्यार्घ्योदकेन पूजाकार्या। ततः पुरतो भद्रासने यन्त्रं वा कुण्डलिनीं निधाय स्ववामवामे विन्दुत्रिकोणषट्कोणवृत्त-चतुरस्रात्मकं मण्डलं विलिख्य। सामान्यार्घ्योदकेनाभ्युक्ष्य। मूलविद्या-मुच्चार्य, श्रीपरमार्थदेवताकलशमण्डलाय नमः। इति सम्पूज्य। तत्र फडिति आधारं प्रक्षाल्य, संस्थाप्य। मं वह्निमण्डलाय दशकला-त्मने नमः। इति सम्पूज्य। तदुपरि अस्त्रेण क्षालितं रक्तमाल्यादि-विभूषितं कलशं संस्थाप्य।

शम्भुनाथ यथा देवी विष्णुनाथ यथा पुरी।
ब्रह्मणा च यथा पूर्वं तथा त्वां स्थापयाम्यहम् ॥ १ ॥

अं अर्कमण्डलाय द्वादशकलात्मने नमः। इति सम्पूज्य। तत्राऽना-मिकाङ्गुष्ठकरामृतधारया कलशं कारणेनापूर्य्य। ॐ सोममण्डलाय षोडशकलात्मने नमः। इति सम्पूज्य—ॐ सौः ह्सौः पुष्पं दत्वा। ॐ ह्रीं परमस्वामिनि परमाकाशशून्यवाहिनिचन्द्रसूर्याग्निविकर्षिणि पवित्रं विश विश स्वाहा। इति कलशे दशधा प्रजप्य। कुलद्रव्यं सन्तर्प्य पञ्चीकरणमूर्ध्वहस्तं विभाव्य।

ॐ सौः ह्सौः ग्लां ग्लीं ग्लूं ग्लैं ग्लौं ग्लः। अमृते अमृतोद्भवे अमृतवर्षिणि अमृतेश्वरि अमृतस्वरूपिणि अमृतं श्रावय शुक्रशापात्सुरां मोचय मोचय ॐ सौः ह्सौः मोचिकायै नमः। इति सप्तधा प्रजप्य।

ॐ छां छीं छूं छैं छौं छः ह्लीं छुरिकायै रिशोभिनि विकारमस्य द्रव्यस्य हर हर स्वाहा। ह्लीं ह्लीं त्रिर्जपित्वा, आनन्देश्वरगायत्रीं द्रव्योपरि त्रिर्जपेत्।

ॐ सौः ह्सौः आनन्देश्वराय विद्महे सुरादेव्यै च धीमहि तन्नोऽर्द्धनारीश्वरो प्रचोदयात्। ॐ सौः ह्सौः हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृत सद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं वहत्। इति त्रिर्जपेत्। ततो मूलं दशधा प्रजप्य।

ॐ एकमेव परं ब्रह्मस्थूलसूक्ष्ममयं ध्रुवम्।
कायोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्॥
ॐ सूर्य्यमण्डलसम्भूते वरुणालयसम्भवे।
अमाबीजमयं देवि शुक्रशापाद्विमुच्यताम्॥
वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि।
तेन सत्येन मे देवि ब्रह्महत्यां व्यपोहतु॥
ॐ पावमानपरानन्दः पावमानपरो रसः।
पावमानं परं ज्ञानं तेन त्वां पावयाम्यहम्॥

इति त्रिर्जपित्वा।

ॐ वां वीं वूं वैं वौं वः ब्रह्मशापविमोचितायै सुरादेव्यै नमः, इति त्रिः। ॐ शां शीं शूं शैं शौं शः शुक्रशापविमोचितायै सुरादेव्यै नमः। इति त्रिर्जपित्वा।

ॐ ऐं ह्लीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुराकृष्णशापं विमोचय विमोचय अमृतं श्रावय श्रावय हुं फट् स्वाहा। इति त्रिर्जपित्वा।

चितायै सुरादेव्यै नमः । इति त्रिः ॥ ॐ ऐं ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुराकृष्ण शापं विमोचय विमोचय अमृतं श्रावय श्रावय हुँ फट् स्वाहा ॥ इति त्रिः ॥

ब्रह्मशापविनिर्मुक्ता त्वं मुक्ता शुक्रशापतः ।
विमुक्ता कृष्णशापेन पवित्रा भव साम्प्रतम्[1] ॥

अथ आनन्दभैरवं आनन्दभैरवीं च ध्यायेद्यथा—

ॐ सूर्यकोटिप्रतीकाशं चंद्रकोटि सुशीतलं ।
अष्टादशभुजं देवं पंचवक्त्रं त्रिलोचनं ॥
अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरिस्थितं ।
वृषारूढं नीलकंठं सर्वाभरणभूषितं ॥
कपालखट्वांगधरं घंटाडमरुवादिनं ।
पाशांकुशधरं देवं गदामुशलधारिणं ॥
खड्गखेटकपट्टीशमुद्गरं शूलदंडकं ।
विचित्रखेटकं मुंडं वरदाभयपाणिकं ॥
लोहितं देवदेवेशं भावयेत्साधकोत्तमः ।
दत्वा पुष्पांजलिं कुंभे जपेदानंदभैरवं ॥

इति ध्यात्वा ॥ ॐ सौः ह्यौं सहक्षमलवरयूं सुरादेव्यै वषट् ॥ इति त्रिः संपूज्य ॥ अथानंदभैरवांकोपविष्टामानंदभैरवीं ध्यायेद्यथा—

समुद्रमथ्यमाने तु क्षीराब्धौ सागरोत्तमे ।
तत्रोत्पन्ना सुरादेवी कुमारीरूपधारिणी ॥
भावयेच्च सुरां देवीं चंद्रकोटयुतप्रभां ।
हिमकुंदेन्दुधवलां पंचवक्त्रां त्रिलोचनां ॥
अष्टादशभुजैर्युक्तां सर्वानंद करो घनां ।
प्रहसंतीं विशालाक्षीं देवदेवस्य सन्मुखीं ॥

---

१. शांप्रतं ।

नव कुंभधरां शांतां नव पात्रधरां पुरां।
नग्ना कालाग्निसदृशी कृतहास्या लसन्मुखी ॥
आनंदभैरवांकस्था सुराध्येया मुमुक्षुभिः ॥

इति ध्यात्वा पुष्पाञ्जलिं क्षिपेत् ॥

सहक्षमलवर्यीं सुधादेव्यै वषट् ॥ इति त्रिः संपूज्य ततः द्रव्यमध्ये त्रिकोणं विलिख्य ॥ तत्र अकारादि षोडश स्वराः दक्षिणरेखायां ककारादि षोडशाक्षराणि उपरि रेखायां ॥ थादि षोडशार्णाः वामरेखायां ॥ मध्ये हलाक्षान् वर्णान् स बिन्दून् लिखेत् ॥ ततो मूलाधारे त्रिकोणकुंडलिनीं ध्यात्वा । सुषुम्णांतर्गत ब्रह्मपथेन परमशिवं समानीय हंसः सोहं स्वाहा ॥ इति मन्त्रेण तयोरैक्यं विभाव्य तदुद्भवामृतं वहन्नारापुटपथेन कुंभे समायोज्य ॥ अमृतमयं द्रव्यं विभाव्य षडंगमंत्रेण सकलीकृत्य ॥ हुमित्यवगुंठ्य ॥ धेनुयोनिमुद्रां प्रदर्श्य । वमितिसुधाबीजं जपेत् ॥ मूलमष्टधा जपेदितिद्रव्यशुद्धिः ॥

अथ विशेषार्घ्यः ॥०॥ ततः । आत्मश्रीचक्रयोर्मध्ये विशेषार्घ्यं संस्थापयेत् ॥ तद्यथा ॥ त्रिकोणषट्कोणवृत्तचतुरस्रं मंडलं विलिख्य । चतुरस्रे-पूजनं ॥ पूं पूर्णगिरिपीठाय नमः दक्षे ॥ उं उड्डियमानपीठाय नमः ॥ पूर्वे ॥ कां कामरूपपीठाय नमः पश्चिमे ॥ जां जालंधरपीठाय नमः उत्तरे ॥ इति संपूज्य ॥ षट्कोणे षडंगं संपूज्य हृदयाय नमः ॥३॥ ततस्त्रिकोणे ॥ क्लीं ह्रीं नमः अग्रे ॥ स्त्रीं हूं नमः दक्षे ॥ फट् नमः वामे ॥ इति त्रिकोणं संपूज्य मध्ये डों ह्रीं आधारशक्तये नमः ॥ इति संपूज्य ॥ त्रिकोणगर्भे त्रिकोणषट्कोणभूषितां यंत्रिकां संस्थाप्य । नम इति सामान्यार्घजलेनाभ्युक्ष्य ॥ वह्नेर्दशकलाः पूजयेत् ॥ यं धूम्रार्चिषे नमः । रं ऊष्मायै नमः लं ज्वलिन्यै नमः ॥ वं ज्वालिन्यै नमः ॥ शं विस्फुलिंग्यै नमः ॥ षं सुश्रियै नमः ॥ सं स्वरूपायै नमः ॥ हं कपिलायै नमः ॥ ळं हव्यवाहायै नमः ॥ क्षं कव्यवाहायै नमः ॥ मं वह्निमंडलाय दशकलात्मने नमः ॥ इति संपूज्य ॥ षट्कोणे षडंगमंत्रेण षट्कोणं

संपूज्य ॥ मध्ये मूलदेवीं प्रपूज्य ॥ ॐ अस्त्राय फट् इति नारिकेरादिपात्रं सामान्यार्घ्यजलेन प्रक्षाल्य ॥ त्रिकोणवृत्तषट्कोणपात्रे विलिख्य ॥ यंत्रिकोपरि संस्थाप्य पात्रे **पूजयेद्यथा**—कं भं तपिन्यै नमः ॥ खं वं तापिन्यै नमः ॥ गं फं धूम्रायै घं पं मरीच्यै० ॥ ङं नं ज्वालिन्यै० ॥ चं धं रुच्यै० ॥ छं दं सुषुम्णायै० ॥ जं थं भोगदायै० ॥ मं तं विश्वायै० ॥ ञं णं बोधिन्यै० ॥ टं ढं धारिण्यै० ॥ ठं डं क्षमायै० ॥ **इति संपूज्य** ॥ अं अर्कमंडलाय द्वादशकलात्मने नमः ॥ **इति संपूज्य** ततः समस्तव्यस्तमंत्रेण संपूज्य ॥ वं वरुणबीजं ॥ अनुलोमविलोममातृकां च ॥

ॐ अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः ॥

कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं क्षं ॥ ऊं क्षं: लं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं जं झं ञं छं चं ङं घं गं खं कं अः अं ओं ओं ऐं एं लृं लॄं ॠं ऋं ऊं उं ईं इं आं अं भि ॥ इति **मूलं च पठन् अमृतेन त्रिकोणं प्रपूज्य** ॥ जलेन भागमेकं प्रपूज्य ॥ तत्र गंधादिनिःक्षिप्य ॥ **सोमसण्डलं पूजयेद्यथा** ॥ अं अमृतायै नमः ॥ आं मानदायै नमः ॥ इं पूषायै नमः ॥ ईं तुष्टयै नम ॥ ॐ पुष्टयै नमः ॥ ॐ रत्यै नमः ॥ ऋं धृत्यै नमः ॥ ॠं शशिन्यै नमः ॥ लृं चंद्रिकायै नमः ॥ लॄं कांत्यै नमः ॥ एं ज्योत्स्नायै नमः ॥ ऐं श्रियै नमः ॥ ओं प्रीत्यै नमः ॥ श्रीं अंगदायै नमः ॥ अं पूर्णायै नमः ॥ अः पूर्णामृतायै नमः ॥ उं सोममंडलाय षोडशकलात्मने नमः ॥ **इति संपूज्य** ॥ द्रव्यमध्ये त्रिकोणं विलिख्य दक्षिणरेखायां अं ॥ १६ ॥ उपरि रेखायां कं ॥ १६ ॥ वामरेखायां थं ॥ १६ ॥ **इति विलिख्य** ॥ मध्ये हं लं क्षं विलिख्य मूलखंडत्रयेण त्रिकोणं संपूज्य ॥ षट्कोणे षडंगं संपूज्य ॥ गंगेत्यादिना तीर्थमावाहय ॥ आनन्दभैरव-आनन्दभैरव्यौ ध्यात्वा ॥ स्वस्वमन्त्रेण संपूज्य ॥ पूर्वादितः ॥ ग्लुगगनरत्नेभ्यो नमः ॥ स्लुं स्वर्गरत्नेभ्यो नमः ॥ म्लुं मर्त्यरत्नेभ्यो नमः ॥ प्लुं पातालरत्नेभ्यो नमः ॥ मध्ये न्लुं नागरत्नेभ्यो

नमः ॥ इति संपूज्य ॥ ततः शुद्ध्यादिकं शोधयेद्यथा ॥ तत्र विंदुत्रिकोण-चतुरस्रं मंडलं विलिख्य ॥ तत्र शुद्धिपात्रं संस्थाप्यमिति संशोध्य ॥ रमिति संदह्य ॥ वमिति आप्लाव्य ॥ धेनुयोनिमुद्रां प्रदर्श्य ॥ मत्स्य-मुद्रया आच्छाद्य ॥

छागलादिव पात्रादिक्रतुरूपाय ते नमः ॥
प्रीत्यर्थं देवदेव्यास्तु पवित्रा भव साम्प्रतम् ॥

ॐ प्रनदविष्णुस्तवते वीर्य्येण मृगो न भीमः क्व च रोगरिष्ठा यस्योरु त्रिषु विक्रमेणेष्वधिक्षियं ति भुवनानि विश्वा ॥ इति द्वितीया शोधनम् ॥

ततस्तत्रैव ॥ तथैव चतुरस्रे मीनपात्रं समारोप्य पूर्ववत् ॥ यमिति संशोध्य ॥ रमिति संदह्य वमित्याप्लाव्य ॥ पूर्वोक्तमुद्रां प्रदर्श्य ॥

कृतावतारो हरिणा कलिना पीडितं जगत् ।
बलिना निगृहीतं तु कौलिकानां हिताय च ॥
भैरवीं परितोषार्थं स्वयं मीनोऽभवद्धरिः ॥

ह्रीं हरये नमः ॥

ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम् ।
उर्वारुकमिव व बन्धनान्मृत्योर्मुक्षीय मा मृतम् ॥

इति तृतीया शोधनम् ॥

पुनस्तथैव चतुरस्रे मुद्रापात्रं संस्थाप्य ॥ शोषणादिकं पूर्ववद्विधाय ॥ मुद्रात्रयं प्रदर्श्य ॥

वेदमात्रार्चनाकाले यानि वस्तूनि साम्प्रतम् ।
सर्वं ध्येयानि दिव्यानि पवित्राणि भवन्ति हि ॥
देवता पूजनीयानि सौरभेयानि साम्प्रतम् ।
बल्यर्थं देवदेव्योश्च पवित्राणीह सिद्धये ॥
ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।

दिवीव चक्षुराततं तद्विशसो विषण्यवो ॥
जागृवांसः समिधत्ते विष्णोर्य्यत्परमं पदम् ।

इति चतुर्थीशोधनम् ॥ अथ पञ्चमीशोधनम् ॥

ॐ विष्णु र्योनिं कल्पयतु त्वष्टारूपाणि विंशतु ।
आषिंचतु प्रजापति र्द्धाता गर्भं दधातु ते ॥
गर्भं देहि सिनीवाली गर्भं देहि सरस्वती ।
गर्भं ते ह्यश्विनौ देवा वां धत्तां पुष्करस्त्रजौ ॥

ओं सौः क्रो जुं सः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं श्रावय श्रावय स्वाहा ॥ ओं ग्लां ग्लों ग्लूं ग्लौं ग्लः स्वाहेति दशधा प्रजप्य ॥ ततः सर्वं हुमित्यवगुण्ठ्य धेनुमुद्रया अमृतीकृत्य ॥ योनिमुद्रां प्रदर्श्य ॥ मत्स्यमुद्रया आछाद्य ॥ तालत्रयेण दशदिग्बन्धनं कुर्य्यात् ॥ तदुपरि मूलं सप्तधा जपित्वा सर्वांशं कारणे निःक्षिप्य ॥

धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहम् ।
स्वाहां तोयं महामन्त्रः शुक्रत्यागे प्रकीर्तितः ॥
उभयोः कुलामृतं भद्रे गृह्णीयाद्देवदुर्लभम् ।
मनुनानेन देवेशि क्षिप्त्वा पात्रतृतीयके ॥
ब्रह्माण्डरससंभूत मशेषं रस मावह ।
आपूरितं महापात्रं पीयूषरसमावह ॥
अखण्डैकरसानन्द करे वर शुधात्मनि ।
स्वछन्दस्फुरणामत्र निधेह्यकुलरूपिणी ॥
अकुलस्यामृताकारे सिद्धिज्ञानकरेवरे ।
अमृतत्वं निधेह्यस्मिन् वस्तूनि क्लिन्नरूपिणी ॥
तद्रूपेणैकरस्यं च कृत्वा ह्येतत्स्वरूपिणी ।
भूत्वा परामृताकारं मयि विस्फुरणं कुरु ॥

अनेन कारणमामन्त्र्य ॥ तत्र स्वमूलदेवतामावाह्य ॥ तालत्रयेण दिशः संवन्ध्य ॥ अवगुण्ठनमुद्रयाऽवगुंठ्य ॥ धेनुयोनिमुद्रां प्रदर्श्य ॥ मत्स्य-मुद्रया आछाद्य ॥ षडंगेन सकलीकृत्य ॥ मूलं दशधा जप्त्वा ॥ देवतारूपं पात्रं विभाव्य ॥ ततो देव्या आज्ञां गृहीत्वा ॥ पात्राणि स्थापयेद्यथा ॥ घटश्रीपात्रयोर्मध्ये पात्राणि स्थापये ॥ गुरुपात्रं ॥ १ ॥ भोगपात्रं ॥ २ ॥ शक्तिपात्रं ॥ ३ ॥ योगिनीपात्रं ॥ ४ ॥ वीरपात्रं ॥ ५ ॥ वलिपात्रं ॥ ६ ॥ पाद्यपात्रं ॥ ७ ॥ आचमनीयपात्रं ॥ ८ ॥ मधुपर्कपात्रं ॥ ९ ॥

ततः श्रीपात्रामृतेन त्रिधा भाले आनंदभैरवं तर्प्पयेत् आनंदभैरव-मन्त्रेण ॥ आनंदभैरवीमन्त्रेण आनंदभैरवीं च त्रिधा तर्प्पयेत् ॥

ततो गुरुपात्रामृतेन गुरुपादुकां शिरसि त्रिधा संतर्प्य ॥ एवं परम-गुरुपदापरगुरुपरमेष्ठी गुरून् संतर्प्य गुरुपात्रेण ॥ ततः स्वेष्टदेवतां सवाहनां सपरिवारां सायुधां तर्प्पयेत् स्व हृदि

श्रीपात्रस्थापनसंस्काराः सर्वत्र कुलपूजने ।
अकृत्वा पापभाङ्मंत्री पूजा च विफला भवेत् ॥ ८ ॥

इति कलशपूजाविधिः ॥

ततः आचार्यः शक्तिवीरानाह्वाय ॥ ते सर्वे आगत्य कृताञ्जलिपुटाः भूत्वा ॥

श्रीनाथादि गुरुत्रयं गणपतिपीठत्रयं भैरवं,
सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमं साम्भवम् ॥
वीराद्यष्टचतुष्टषष्ठ नवकं वीरावली पञ्चकम् ।
श्रीमन्मालिनि मंत्रराजसहितं वन्दे गुरोर्मण्डलम् ॥ ९ ॥

वं संप्राथ्य पुनः अनेन प्रणमेत्

वीरान् भैरवरूपिणस्तदवलाः श्रीभैरवीरूपिणी
नामं नाममुदारपादकमलं श्रीमद्गुरूणां तथा ।

देवं मानसपंकजे विमलया शक्त्या समालिङ्गितम्
ध्यायं ध्यायमहं नमामि विमलं, चक्रं सचक्रेश्वरम् ॥

ततो गुरुभयात् शनैः शनैः स्वासनानुपविश्य ततो आचार्य्याज्ञां लब्ध्वा न्यासध्यानपूर्वकस्वेष्टदेवमंत्रम् अष्टोतरशतं सहस्र वा जप्त्वा गुह्यादिना समर्प्याचार्य्यं प्रार्थयेत् ॥

मातङ्गी भुवनेश्वरी च वगला, धूमावती भैरवी ।
काली छिन्नशिरोधरा भगवती, तारा रमा सुन्दरी ॥

दातुं न प्रभवन्ति वांछितफलं, यस्य प्रसादं विना ।
तं वन्दे शिवरूपिणं निजगुरुं, सर्वार्थसिद्धिप्रदम् ॥

एवं गुरुं प्रार्थयित्वा ॥ ततो आचार्य्यः स्वेष्टदेवता पूजां कुर्यात् ॥ ततो विशेषार्घोदकेन यन्त्रं त्रिःसंप्रोक्ष्य गंधपुष्पाक्षतादिभिः यन्त्रं सम्पूज्य ॥ ततः पीठपूजां कुर्य्यात् ॥ यथा ॥ ॐ मं मण्डूकाय नमः ॥ कां कालाग्निरुद्राय नमः ॥ मूं मूलप्रकृत्यै० ॥ आं आधारशक्त्यै० ॥ कूं कूर्म्माय० ॥ अं अनन्ताय० ॥ वां वाराहाय० ॥ पं पृथिव्यै० ॥ सं सप्तसमुद्रेभ्यो० ॥ नं नन्दनोद्यानाय० ॥ कं कल्पकोट्याय० ॥ मं मणिद्वीपाय० ॥ मं मणिहर्म्याय० ॥ हें हेमपीठाय० ॥ रं रत्नसिंहासनाय० ॥ स्वें स्वेतछत्राय० ॥ सिंहासनस्याग्रे पादकोणेषु ॥ धं धर्माय० ॥ ज्ञां ज्ञानाय० ॥ वैं वैराजाय० ॥ ऐं ऐश्वर्याय० ॥ पूर्वादिचतुर्गात्रे ॥ अं अधर्माय० ॥ अं अज्ञानाय० ॥ अं अवैराजाय० ॥ अं अनेश्वर्य्याय० ॥

ततो मध्ये ॥ आं आनन्दकन्दाय० सं संविन्नालाय० ॥ पं प्रकृतिमयकेशरेभ्यो० ॥ विं विकारमयकेशरेभ्यो० ॥ पं पंचाशद्वर्णबीजाट्यसर्वतत्त्वस्वरूपायै० ॥ कं कर्णिकायै० ॥ तस्यां अं अकर्ममण्डलाय० सं सोममण्डलाय० रं वह्निमण्डलाय० ॥ सं सत्वाय० ॥ रं रजसे० तं तमसे नमः ॥ २ ॥ मां मायातत्त्वाय० ॥ कं कलातत्त्वाय० ॥ विं विद्यातत्त्वाय० ॥ पं परतत्त्वाय० ॥

ततो पीठशक्तीर्जयादिका नवसंज्ञका आवाह्य पूर्वादिक्रमेणाष्टदिक्षु अष्टौ ॥ नवमीमध्ये ॥ ओं ह्रीं जयायै० ॥ विजयायै० ॥ अजितायै० ॥ २ ॥ पराजितायै० ॥ नित्यायै० ॥ विलासिन्यै० ॥ दोग्ध्यै० ॥ अघोरायै० ॥ मध्ये ॥ मङ्गलायै० ॥ इतिगन्धपुष्पाक्षतैः सम्पूज्य ॥ आह्वानमुद्रया ॥ पुष्पाणि संगृह्य तेषु पुष्पेषु हृत्कमलात्सुषुम्नामार्गेण आगतां यथोक्तरूपां देवीं विभाव्य ॥ मूलं ॥

ॐ महापद्मवनांतस्थे कारणानन्दविग्रहे ॥
सर्वभूतहिते मातरेह्येहि परमेश्वरि ॥
ॐ देवेशि भक्तिसुलभे परिवारसमन्विते ॥
यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ॥

इति यन्त्रेषु पुष्पाणि पातयित्वा ॥ आवाहिता भव ॥ स्थापिता भव ॥ सन्निधाना भव ॥ सन्निरुद्धा भव ॥ अवगुण्ठिता भव ॥ देव्यङ्गे षडङ्गानि विन्यस्य सकलीकृता भव ॥ परमीकृता भव ॥ ततो प्राणप्रतिष्ठां कुर्यात् ॥

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं सः ह्रीं ॐ अमुकदेवतायाः प्राणा इह प्राणाः पुनस्तानि वीजानि १९ अमुकदेवताया जीव इह स्थितः ॥ पुनस्तानि वीजानि १९ अमुकदेवतायाः सर्वाणींद्रियाणि १९ वाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥

ततो मूलेन पादार्घ्याचमनमधुपर्कस्नानपुनराचमनवस्त्रयुग्माभरण-हरिद्रा वा कज्जलसिंदूरकुंकुमदर्पणगंधाक्षतपुष्पधूपदीपनैवेद्यपानीय उत्तरापोशानहस्तप्रक्षालनमुखप्रक्षालनचन्दनकरोद्वर्तनमुखादिवासनार्थ—फलतांबूलं च निवेद्य मूलेन ॥ विंदौ विशेषार्घ्यजलेन देवीं त्रिः संतर्प्य मूलेन ॥ देव्यै त्रिः पुष्पाञ्जलिं समर्प्य ॥ स्वेष्टदेवताया अनुज्ञां प्रार्थयेत् ॥ तद्यथा ॥

सच्चिन्मये महादेवि परामृतरसप्रिये ।।
अनुज्ञां देहि भो मातः परिवार्चनाय मे ।।

ततो अनुज्ञां लब्ध्वा तस्या रश्मिरूपान् आवरणदेवतान् विभाव्य ।। ततः त्रिःकोणपृष्ठरेखायां ।। परमप्रकाशानन्दनाथ श्रीगुरुपादुकां पूजयामि तर्प्पयामि नमः ।। परमशिवानन्दनाथश्रीगुरुपादुकां पूजयामि तर्प्पयामि नमः ।। पराशक्त्यम्बाश्रीपा० ।। कौलेश्वरानन्दगुरुपा० ।। शुक्लादेव्यम्बाश्रीपा० ।। कुलेश्वरानंदनाथश्रीपागुरुपा० ।। कामेश्वरीदेव्यंबा श्रीपा० ।। **दक्षरेखायां** ।। भोगानंदनाथश्रीगुरुपा० ।। समयानंदनाथश्रीगुरुपा० ।। विश्वानन्दनाथश्रीपा० ३ ।। विमलानंदनाथश्रीगुरुपा० ।। मदनंदनाथ श्रीगुरुपा० ।। भुवनानंदनाथ श्रीगुरुपा० ।। लीलानंदनाथश्रीगुरुपा० ।। स्वात्मानंदनाथश्रीगुरुपा० ।। प्रियाशक्त्यम्बाश्रीपा० ।। मध्यप्राक् याम्यसौम्यपश्चिमेषु यथाक्रमं हृल्लेखाद्याः पूज्याः ओं हृल्लेखायै नमः ।। हृल्लेखां पा० ।। गगनायै० ।। गगनां पा० ।। रक्तायै० ।। रक्तां पा० महोक्षुष्मायै० ।। महोक्षुष्मां पा० ।। करालिकायै० कारालिकां पा० ।। षट् कोणेषु ।। पूर्वकोणे दंडकुंडलिकागुणाभयकरां ब्रह्मणा सहितां गायत्रीं पा० ।। वायुकोणे ।। परस्वाक्षमाला वराभयकरां रुद्रेण सहितां देवीं पा० ।। वह्निकोणे ।। रत्नकुम्भं मणिकरंडकं कराभ्यां दधतं धननायकं सरस्वतीदक्षिणहस्तेनालिङ्गनवत्पा० । वामेनांबुजधारिणा युतं जयामहालक्ष्म्या युतं पा० ।। **पश्चिमकोणे** ।। वाणपाशाङ्कुशरासनानि धारयन्तं जपारक्तं मदनं वामेनोत्पलधारिणा दक्षिणेनालिङ्गनवत्पारत्या युक्तं **पा०** ।। **ईशानकोणे** ।। प्रियान्वितविघ्नराजं सृणिपाशधरं पा० ।। **नैऋत्यकोणे** ।। सिन्दूरसदृशाकारां उद्दाममदविभ्रमां धृतरक्तोत्पलां पुष्टि पा० ।। **षट्कोणस्योभयपार्श्वे** ।। शंखनिधिं पद्मनिधिं पा० ।। ततः षट्कोणे केशरेषु षडङ्गानि संपूज्य संतर्प्य ।। **पुष्पाञ्जलिं गृहीत्वा** ।।

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्प्यते तुभ्यं समस्तावरणार्चनम् ।।

सामान्यार्घ्यजलेन मूलेन देवीं त्रिःसंपूज्य संतर्प्य ॥ ततोष्टदलेषु पूर्वाग्न्यादिमारभ्य वामावर्त्तनं पूजयेत् ॥ ओं अनङ्गकुसुमायै नमः ॥ अनङ्गकुसुमां पू० ॥ अनंगकुसुमातुरायै० ।। अनङ्गकुसुमातुरां पू० । अनंगमदनायै० ॥ अनङ्गमदनां पू० त० ॥ अनङ्गमदनातुरायै० । अनङ्गमदनातुरां पू० ॥ भुवनपालायै० ॥ भुवनपालां पू० । गगनवेगायै० ॥ गगनवेगां पू० ॥ शशिरेखायै० ॥ शशिरेखां पू० ॥ गगनरेखायै० । गगनरेखां पू० ॥ पुष्पाञ्जलिं गृहीत्वा ॥ **अभीष्टद्वितीयावरणार्चनम् ॥ २ ॥**

ततः सामान्यार्घ्यजलेन मूलेन देवीं त्रिःसंपूज्य संतर्प्य ॥ ततः षोडशपत्रेषु स्वाग्न्यादिनारभ्य वामावर्त्तेन पूजयेत् ॥ ओं कराल्यै० ॥ करालीं पू० त० ॥ विकराल्यै० ।। विकरालीं पू० त० ॥ उमायै० ॥ उमां पू० ॥ सरस्वत्यै ॥ सरस्वती पू० ॥ श्रियै० ॥ श्रीं पू० ॥ ५ ॥ दुर्गायै० ॥ दुर्गां पू० ॥ उषायै ॥ उषां पू० ॥ लक्ष्म्यै० ॥ लक्ष्मीं पू० ॥ श्रुत्यै नमः ॥ श्रुतिं पू० ॥ धृत्यै ॥ धृतिं पूजयेत् ॥ स्मृत्यै० ॥ स्मृतिं पू० ॥ श्रद्धायै० ॥ श्रद्धां पू० ॥ मेधायै० ॥ मेधां पू० ॥ मत्यै ॥ मतिं पू० ॥ कान्त्यै० ॥ कान्तिं पू० ॥ आर्य्यायै० ॥ आर्य्यां पू० ॥ पुष्पाञ्जलिं गृहीत्वा ॥ **अभीष्टतृतीयावरणार्चनम् ॥ ३ ॥**

ततः सामान्यार्घ्यजलेन मूलेन देवीं त्रिःसम्पूज्य ॥ सन्तर्प्य ॥ ततः षोडशदलपद्माद्वहिः ॥ स्वाग्न्या मातृत्या वामावर्त्तेन ॥ ततोष्टपत्रे परिचारकान् पूजयेत् ॥ ॐ अनङ्गरूपायै नमः ॥ अनङ्गरूपां पू० ॥ अनङ्गमदनायै० ॥ अनङ्गमदनां पू० ॥ मदनातुरायै० ॥ मदनातुरां पू० ॥ भुवनवेगायै० ॥ भुवनवेगां पू० ॥ भुवनपालिकायै० ॥ भुवनपालिकां पू० ॥ सर्वशिसिरायै० ॥ सर्वशिसिरां पू० ॥ अनंगवेदनायै० ॥ अनंङ्गवेदनां पू० ॥ अनङ्गमेखलायै: ॥ अनङ्गमेखलां पू० ॥ ततः पुष्पाञ्जलिं गृहीत्वा ॥ **अभीष्टचतुर्थावरणार्चनम् ॥ ४ ॥**

ततः सामान्यार्घ्यजलेन मूलेन देवीं त्रिःसंपूज्य संतर्प्य ॥ ततश्चतुरस्रे पूर्वादिमारभ्य वामावर्त्तेन ईशानान्तं इन्द्रादीन् पूजयेत् ॥ यथा ॥ ॐ इंद्राय नमः ॥ इन्द्रं पूजयामि तर्प्पयामि नमः ॥ अग्नये नमः ॥ अग्निं पू० ॥ यमाय० ॥ यमं पू० ॥ निर्ऋतये० ॥ निर्ऋतिं पूजयेत् ॥ वरुणाय० ॥ वरुणां पू० ॥ वायवे० ॥ वायुं पू० ॥ कुवेराय नमः ॥ कुवेरं पू० ॥ ईशानाय० ॥ ईशानं पू० ॥

ततः उर्ध्वोधः ब्रह्माणमनन्तं पू० ॥ ततस्तद्वाह्ये वज्रादीन् पूजयेत् ॥ वज्राय नमः ॥ वज्रं पू० ॥ शक्त्यै० ॥ शक्ति ॥ दण्डाय ॥ दण्डं पू० ॥ खङ्गाय० ॥ खङ्गं पू० ॥ पाशाय० ॥ पाशं पू० ॥ अङ्कुशाय० ॥ अङ्कुशं पू० ॥ गदायै ॥ गदां पू० ॥ त्रिशूलाय० ॥ त्रिशूलां पू० ॥ पद्माय० ॥ पद्मं पू० ॥ चक्राय नम० ॥ चक्रं पू० ॥ ततः सामान्यार्घ्यजलेन मूलेन देवीं त्रिः संपूज्य संतर्प्य ॥ पुष्पाञ्जलिं गृहीत्वा ॥ **अभीष्टपञ्चमावरणार्चनम्** ॥ ५ ॥

ततो भुवनेश्वरीदेवतायैः ॥ २ ॥ सांगायै सपरिवारायै सायुधायै सवाहनायै सशक्तिकायै[1] पूजयामि तर्प्पयामि नमः ॥ ततः सामान्यार्घजलेन देवीं संपूज्य संतर्प्य ॥ पुष्पाञ्जलिमादाय **अभीष्टसमस्तावरणार्चनम्** ॥ इत्युच्यार्घ्यं यन्त्रे निक्षिप्य ॥

ततो वटुकादीन् संपूज्य वलिं दद्यात् यथा ॥ तत्र पूर्वे त्रिकोणवृत्त चतुरस्रमण्डलं कृत्वा ॥ तत्राधारं सजलपात्रं संस्थाप्य ॥ तस्योपरि पात्रं निधाय ॥ ॐ वं वटुकनाथाय नमः ॥ इति मन्त्रेण गंधादिभिस्तस्मिन् संपूज्य ॥

ततो वामाङ्गुष्ठाऽनामिकाभ्यां शुद्धिकारणं गृहीत्वा ॥ अनेन मन्त्रेण वलिं दद्यात् ॥

---

१. "शशक्तिकायै" इति पाठः ।

ओं वां वीं वूं वैं वौं वः ॐ ह्रीं एह्येहि देवीपुत्र वटुकनाथ कपिल-जटाभारभास्वरत्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय नाशय सर्वोपचार-सहितं वलिं गृह्ण गृह्ण स्वाहा ॥ एष वलि र्वटुकनाथाय नमः ॥

करकलितकपालः कुण्डली दंडपाणि-
स्तरुणतिमिरनीलव्यालयज्ञोपवीती ॥
ऋतुसमयसपर्याविच्छेदहेतु-
र्जयति वटुकनाथः सिद्धिदः साधकानाम् ॥

इति वटुकवलिः ॥

ततः दक्षिणे पूर्ववत्मण्डलं कृत्वा ॥ तत्र साधारणजलपात्रं निधाय ॥ क्षां क्षेत्रपालायनमः ॥ इति गंधादिना संपूज्य ॥ ॐ क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्थानक्षेत्रपाल एह्येहि मर्वान् कामान् पूरय पूरय सर्वोपचारसहितं वलिं गृह्ण गृह्ण स्वाहा ॥ इति वामाङ्गुष्ठतर्जनीभ्यां वलिमुत्सृजेत् ॥

योऽस्मिन् क्षेत्रे निवासे च क्षेत्रपाः सकिंकरः ॥
स प्रीतो वलिदानेन सर्वरक्षां करोतु मे ॥
निर्वाणं निर्विकल्पं निरुपमवदनं क्षेत्रपालं क्षकारम् ।
कूर्चाभं वज्रदंष्ट्रं हुतवहवदनं रौद्रमुन्मत्तमानम् ॥
फट्कारं बाहुनागं भृकुटितऽमुखं भैरवं शूलपाणिम् ।
खट्वाङ्गं व्योमनीलं डमरूकसहितं क्षेत्रपालं नमामि ॥

इति क्षेत्रपालवलिः ॥

ततो पश्चिमे पूर्ववन्मण्डलं कृत्वा ॥ तत्र साधारणं जलपात्रं निधाय ॥ ॐ यां योगिनीभ्यो नमः ॥ इति गं दिशतु सकलकामान् कौलिकानां गणेशः ॥ इति ध्यात्वा ॥ इति वलिः ॥

आत्मश्रीचक्रयोर्मध्येपूर्ववन्मण्डलं कृत्वा ॥ तत्र साधारं सजलपात्रं निधाय ॥ सां सीं सं सैं सौं सः सर्वेभ्यो भूतेभ्यो नमः ॥ इति मन्त्रेण

पाद्यादिभिः सम्पूज्य सर्वाङ्गुलिभिः ॥ तत्त्वात्मकं गृहीत्वा ॥ ॐ सर्वेभ्यो भूतेभ्यो एषबलिं गृह्ण गृह्ण स्वाहा ॥ इत्यनेन बलिं दद्यात् ॥

ततो मूलेन पुष्पाञ्जलिं दद्यात् ॥ सन्यासध्यानसेतुपूर्वकं शतमष्टोत्तरसहस्रं वा मूलं जप्त्वा ॥ गुह्यादिना समर्प्य ॥ सूतकमोचनं कुर्य्यात् ॥ ततस्स्तवादिकं पठेत् ॥ ततः छत्रचामरादि समर्प्य ॥ 'देवि प्रपन्नार्तिहरे प्रसीदे' ति मन्त्रेण वीरैः सह स्वेष्टदेवं प्रणमेत् ॥ कुलदीपं प्रदर्श्याय शक्तिपूजं समाचरेत् ॥ यथा नवाङ्गुलोन्नतं पात्रं फडिति मन्त्रेण प्रक्षाल्याधारे संस्थाप्य रक्ततूलिकात्मकवर्त्तिकां निर्माय तस्मिन् कर्पूराद्यं क्षिप्त्वा प्रज्वाल्य दक्षिणहस्तेन गृहीत्वा ॥ देव्योपरि अनेन मन्त्रेण सप्तवारं भ्रामयित्वा ॥ यथा—

समस्तचक्रचक्रेशि देवेशि श्वभगात्मके ।
आरार्त्तिकमिदं देवि गृहाण मम सिद्धये ॥

एवं आरार्त्तिकं समर्प्य शक्त्यार्चनं कुर्यात् ॥ यथा ॥

रात्रौ पर्यटनं चैव रात्रौ च शक्तिपूजनम् ।
न करोति कथं देवि साधकः कौलिको भवेत् ॥

॥ इति कुलचूडामणौ ॥

विना पीत्वा सुरां भुक्त्वा मांसं गत्वा रजस्वलाम् ।
यो जपेद्दक्षिणां देवीं तस्य दुःखं पदे पदे ॥

॥ इति कुलचूडामणौ कलीतन्त्रे च ॥

विना शक्तिमहेशानि न तत्त्वग्रहणं चरेत् ॥

॥ तथा च रुद्रजामलेपि ॥

आनीय कौलिकीं शक्तिं चक्रे वै कुलनायिके ।
पाययित्वा पिबेद्द्रव्यं इति शास्त्रस्य निश्चितम् ॥

इत्यादि वचनात् शक्त्यार्चनान्तें तत्त्वस्वीकारस्यावश्यकत्वमस्ति ॥ शक्त्यार्चनं यथा ॥ तदुक्तमुत्तरतन्त्रे ॥

यामभध्ये गते रात्रौ कुलगेहं गतं पुमान् ।
ताम्बूलपूरितमुखो धूपामोदसुगंधितः ॥
रक्तचन्दनस्निग्धांगो रक्तमाल्यानुलेपनः ।
रक्तवस्त्रपरिधानो लाक्षारुणगृहे स्थितः ॥
रक्तमाल्येन संवीतो रक्तपुष्पविभूषितः ।
पञ्चीकरणसंकेतैः पूजयेत्कुलनायिकाम् ॥

॥ इति कुलनायिका यथा ॥

नटी कपालिनी वेश्या पुष्कंसीनापितांगना ।
रजकी रञ्जकी चैव स्वैरंध्री च सुवासिनी ॥
नटी कपालिका चैव तथा गोपालकन्यका ॥
विशेषवैदग्ध्ययुताः सर्वा एव कुलांगना ॥
गुरुभक्ता देवभक्ता घृणालज्जाविवर्जिता ।
संगोपनपराम्नायस्तारुण्यः सर्वसिद्धिदः ॥

एवं यथोदितां शक्तिं प्रसूनतूलिकोपरि संस्थाप्य पूजामारभेत् । तदुक्तं तत्रैव

अद्वैताचारसम्पन्नां गुरुभक्तां दृढव्रताम् ।
सदाऽनुष्ठाननिरतां सात्विकीभक्तिसंयुताम् ॥
कार्यकालस्य रहितां कुलीनां भक्तवत्सलाम् ।
चातुर्य्योदार्य्यदाक्षिण्यकारुण्यादिगुणैर्युताम् ॥
रूपयौवनसम्पन्नां शीलसौभाग्यशालिनीम् ।
सदा परिगृहीतां वा स्वयं संकेतमागताम् ॥
अथवा तत्क्षणायातां मदनानलतापिताम् ।
विलिप्तां रक्तगन्धेन रक्ताम्बरविभूषिताम् ॥
सुगन्धितरक्तकुसुमां सर्वाभरणभूषिताम् ।
स धूपदीपितां तन्वीं दूतीकर्मणि योजयेत् ॥
एवं तां प्रयजेत्तां तु प्रसूनतूलिकोपरि ॥

व्यंगांगीं विकृताङ्गीं वा सविकल्पकमानसीम् ।।
वर्षीयसीं पापरतां क्रूरामत्यन्तकोपनाम् ।
अभक्तां मलसां दीनां वर्जयेत्साधकोत्तमः ।।
समानीय कुले सांतामुद्वर्त्तनमनंतराम् ।।
स्नातां शुद्धकूलादि अनुलेपनशोभिताम् ।।
अलङ्कृतांगतश्रान्तीं स्वागतां चासने तथा ।।
वेद्योपरि लिखेद्भद्रे पद्ममष्टदलाष्टकम् ।।
तत्रावाह्य यजेत्पीठे मण्डूकादीन् वरानने ।।

इतिमन्त्रं रुद्रयामले यथा ।।

दक्षिणहस्ते गंधपुष्पाक्षतादिकं गृहीत्वा ।। इतिमन्त्रेणार्चयेत् ।। मण्डूकादिपीठं मन्त्रैः सम्पूज्य इत्यादि अष्टदले सम्पूज्य ।। तत्र चित्रासनमास्तीर्य्य ।। तस्य चतुरस्रे ।। ॐ ह्रीं कामराजाय नमः ।। क्लीं कन्दर्पाय नमः ।। हुँ मन्मथाय नमः ।। ग्लु मीनकेतवे नमः ।। मध्ये स्त्रीं मनोभवाय ।। इति गंधादिभिः सम्पूज्य ।। तद्बाह्ये वटुकाय ।। दुर्गायै । क्षेत्रपालाय ।। भैरवाय ।। इति गंधादिभिः सम्पूज्य

संशोचनमनाचर्य स्त्रीषु द्रव्येषु साधकः ।।
कृतेपि सिद्धिहानिः स्यात्कुद्धा भवति चण्डिका ।।

तस्माच्छक्तिशुद्धिः कार्य्या ।। तदुक्तं कौलन्त्रे ।।

अभिषेकाद्भवेच्छुद्धिर्मन्त्रस्योच्चारणाच्छ्रुतौ ।
रतिकाले महेशानी दीक्षाकाले च कन्यका ।।
बलाद्वा यत्नतोप्यर्थादभिषेकं समाचरेत् ।।
सुधया रेतसा वापि जलेन मनुना तथा ।।
पूजयेच्चाभिषिंचेद्वै मनुनानेन दशिकः ।।

यथा—

ऐं क्लीं सौः त्रिपुरायै नमः ।।

इमां शक्तिं पवित्रीं कुरु मम शक्तिं कुरु स्वाहा ॥
अनेन मनुना देवि अभिषेकः स्त्रियः सदा ॥

—निरुक्ततन्त्रे च

वाग्भवं कामराजं च स्त्रीबीजं कामराजकम् ।
हस क्लींमंते च दत्वा आधारशक्तिमुच्चरेत् ॥
श्रीपादुकां ततो दत्वा पूजयामि वदेत्ततः ॥
अनेन मनुना तस्या ललाटे सुमनोहरम् ॥
त्रिकोणं तत्र संलिख्य सिंदूराद्यै वरानने ॥

इत्यादि वचनात्तस्या ललाटे अनेन मनुना त्रिकोणं विलिख्य । सिंदूरस्य मन्त्रं यथा—

ऐं क्लीं स्त्रीं क्लीं हस क्लीं आधारशक्तिश्रीपादुकां

पूजयामि ॥ अर्चनं यथा—दक्षिणहस्ते गन्धपुष्पाक्षतं गृहीत्वा प्रत्येकस्थानेऽनेन मन्त्रेण पूजयेत् ॥ तद्यथा—तस्या मौलौ ॥ ॐ गं गणेशाय नमः ॥ केशाग्रे कुंकुलाध्यक्षाय नमः ॥ ललाटे दुं दुर्गायै नमः ॥ भ्रुवोः लं लक्ष्म्यै नमः ॥ रसनायां सं सरस्वत्यै नमः ॥ स्तनद्वये वं वसंताय नमः ॥ मं मदनाय नमः ॥ मुखे सं सुधाकराय नमः ॥ पृष्ठे ग्लं वीजाय नमः ॥ दक्षिणे सं समाश्रियाय नमः ॥ आं आशिरश्चरणावधि ॥ पूज्याः कामकला तस्या ॥ यथा—ॐ साधकाङ्गेषु सर्वशः ॥ इति कालिकाकुलसंभारवचनात्तस्याङ्गेषु कामकला पूज्याः ॥ यथा ॐ श्रद्धायै नमः ॥ प्रीत्यै नमः ॥ रत्यै वा० ॥ धृत्यै० ॥ कीर्त्यै० ॥ मनाभवायै०॥ विमलायै ० ॥ मोहिन्यै० ॥ घोरायै० ॥ मदनोत्पादिन्यै० ॥ मोहिन्यै०॥ दीपिन्यै० ॥ शोषिन्यै ॥ वशंकार्य्यै० ॥ रंजिन्यै०॥ इत्यर्चयेत् ॥

तथा च उत्तरतन्त्रे ॥

ततश्चन्द्रकलाः पूज्या आशिरश्चरणावधि ॥

ओं पूषायै नमः, रमायै० ॥ सुमनायै० ॥ रत्यै० ॥ प्रीत्यै० ॥ घृत्यै० ॥ ऋद्ध्यै० ॥ सोम्यायै० ॥ मरीच्यै० ॥ अष्टमालिन्यै० ॥ मदिरायै० ॥ शशिन्यै० ॥ क्षपायै० ॥ सम्पूर्णमण्डलायै० ॥ तुष्टचै० ॥ अमृतायै० ॥

स्वरैर्युक्ता महेशानि पूज्याश्चन्द्रकला इमाः ॥

ततो ऐश्वर्यत्रिकोणे ॥ ओं चान्द्रयै० ॥ सौर्य्यै० ॥ आग्नेयै० ॥ इति त्रिनाड्याः गंधादिभिः संपूज्य ॥ श्यामारहस्ये ॥

पूजयेन्मदनागारे रक्तचन्दनचर्चिते ।
भगमालामलं प्रोच्यत्र तारानंतरं तथा ॥

ॐ ऐं ह्रीं श्रीं ऐं ज्लूं ज्लं क्लिन्ने ततः परं। सर्वाणी ति भगानीति वशमानय मे ततः ॥ स्त्रीं ह्रीं ल्लूं क्लीं क्लिन्ने क्लीं भगमालिन्यै नमः स्वाहा ॥

पूजयित्वाऽथ तच्चक्रं गन्धैः पुष्पैस्तथाक्षतैः ।
धूपैर्दीपैश्च नैवेद्यैर्विविधैः कुलसाधकः ॥
क्षत्रचामरचादर्श आरार्तिककुलामृतैः ।
विधाय वंदितां तां च तदुच्छिष्टं स्वयं हरेत् ॥

इति कुलागमव ्नात्तस्याग्रेस्तोत्रं स्तोत्रं यथा ॥

नमामि ते देवि पदारविन्दमिति ॥

अस्या स्तोत्रं यथा ॥ तदुक्तं कुलचूडामणौ ॥

मातर्देवि नमस्तेस्तु ब्रह्मरूपधरेऽनघे ॥
कृपया हर मे विघ्नं मन्त्रसिद्धि प्रयच्छ मे ॥
माहेशि वरदे देवि परमानन्दरूपिणि ॥
कृपया हर मे विघ्नं मन्त्रसिद्धि प्रयच्छ मे ॥
कौमारि सर्वविद्येशि कुमारक्रीडने वरे ॥ कृ० ॥
विष्णुरूप धरे देवि विनितासनवाहिनि ॥ कृ० ॥

वाराहिवरदे देवि दंष्ट्रोद्धृतवसुन्धरे ॥ कृ० ॥
शक्ररूपधरे देवि शक्रासुरसुपूजिते ॥ कृ० ॥
चामुण्डे मुण्डमालासृक् चर्चिते विघ्ननाशिनि ॥ कृ० ॥
महालक्ष्मिर्महागोत्रे क्षोभसंतापनाशिनि ॥ कृ० ॥
मितिमातृमये देवि मितिमातृवहिः कृते ॥ कृ० ॥
एके बहुतरे देवि विश्वरूपे नमोस्तु ते ॥
एतत्स्तोत्रं पठेत् यस्तु कर्म्मारम्भे सुसंयतः ॥
विदग्धां वासमालोक्य तस्य विघ्नं न जायते ॥

इति स्तोत्रं ॥ तथा च मालिनीतन्त्रे ॥

अर्चयेद्गन्धपुष्पाद्यैः स्वशिरे तदनन्तरम् ।
मूलमन्त्रं ततः हूं ह्रीं नमः शिवाय ततः परम् ॥
यजेत्तत्पुरुषाघोरसद्योजातेश्वरानपि ।
निवृत्तश्च प्रतिष्ठा च विद्या च तदनन्तरम् ॥
समग्रविद्यामुच्चार्य्य त्रिकोणं चैव पूजयेत् ।
प्रणवादि नमोन्तेन साधकः कुलनायकः ॥
एवं शक्तिं संपूज्य ॥
ततस्तत्र महेशानि वीरैः सह गुरोर्यजेत् ॥

इत्यादिवचनात् वीरैस्सह गुरवे पुष्पाञ्जलिं दद्यात् ॥
गुरुपादुकेतिमन्त्रेण सर्वे स्वस्वासनादुत्थित्वा ॥

पुनश्चक्राकारेण पङ्क्त्याकारेण वा भिन्नासने वद्धपद्मासनः शक्तियुक्तश्चेद् युग्मक्रमेणोपविश्य ॥ सामैकललाटे रक्तचन्दनाक्षतं दत्वा शिवशक्तिधिया पुष्पं च दत्वा ॥

ततो यदि गुरुस्तत्र तिष्ठति ॥ तदादौ गन्धपुष्पाक्षतादिना प्रपूज्यानेन स्तवेत् ॥ तदुक्तं बालात्रिपुरापद्धतौ ॥

व्योमाम्बुजे कर्णिकमध्यसंस्थं
सिंहासने संस्थितदिव्यमूर्ति ।।
ध्यायेद्गुरुं चन्द्रकलाप्रकाशं
चित्पुस्तकाभीतिवरं दधानम् ।।
स्वेताम्वरं स्वेतविलेपयुक्तं
मुक्ताविभूषं मुदति द्विनेत्रम् ।
वामाङ्कपीठे स्थितरक्तशक्ति
मन्दस्मितं सान्द्रकृपानिधानम् ।। १ ।।

मातङ्गी भुवनेश्वरीति स्तुत्वा ।। पुनः वीरैः सह परस्परार्चनं कुर्य्यात् ।। तदुक्तं वामकेश्वरे ।। यथा ।।

पठेत्त्वेदं नमेद्वीरान् वीरवन्दनमाचरेत् ।
स्तुवीद्वीरान् नमेद्वीरान् मन्त्रसिद्धिः प्रजायते ।। २ ।।
जगत्रयाभ्यर्चन शासनेभ्य
पदार्थसम्पादनकोविदेभ्यः ।
समुद्धृतक्लेशमहोरगेभ्यो
नमो नमः साधकनायकेभ्यः ।। ३ ।।
प्रहीनसर्वाश्रयवासनेभ्यः
सर्वार्थतत्त्वोदितशासनेभ्यः ।।
सर्वप्रजाभ्युद्धरणोदतेभ्यो
नमो नमः साधकनायकेभ्यः ।।
विस्तीर्णसंसारमहार्णवेभ्य
स्तृह्मालतोन्मूलनतत्परेभ्यः ।।
जराहजा मृत्युनिवारणेभ्यो
नमो नमः शांभविशांभवेभ्यः ।। ४ ।।
सद्धर्मरत्नाकरभाजनेभ्यो
निर्वाणमार्गोत्तमहैशिकेभ्यः ।।

सर्वत्र सम्पूर्ण मनोरथेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ ५ ॥
लोकानुकम्पाभ्युदितादरेभ्यः
कारुण्यमैत्रीपरिभावितेभ्यः ॥
सर्वार्थतासा परिपूरकेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ ६ ॥
विध्वस्तनिः शेषकुवासनेभ्यः
ज्ञानाग्निनादग्धमलेन्धनेभ्यः ॥
प्रज्ञप्रतिज्ञापरिपूरकेभ्यो
नमो नमः भैरव भैरवेभ्यः ॥ ७ ॥
सर्वार्थतासापरिपूरकेभ्यो
वैनेयपद्माकरबोधकेभ्यः ॥
विस्तीर्णसर्वार्थगुणाकरेभ्यो
नमो नमः भैरव भैरवेभ्यः ॥ ८ ॥
अनन्तकर्मार्जितसासनेभ्यः
ब्रह्मेन्द्ररुद्रादिनमस्कृतेभ्यः ।
परस्परानुग्रहकारकेभ्यो
नमो नमः भैरव भैरवेभ्यः ॥ ९ ॥
विभग्नभूजादिमहामहेभ्यो
प्रपञ्चकाचारपरायणेभ्यः ।
समस्तसौभाग्यकलाकरेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ १० ॥
विभग्नदुः कर्मजवासनेभ्यः
समंततोयुष्टमहाशयेभ्यः ।
लभ्यामलज्ञानकृतास्पदेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ ११ ॥

सर्वाङ्गमाम्भोधिमहाप्लवेभ्यः
श्रीचक्रपूजार्थपरायणेभ्यः ।
श्रीवीरचर्य्याचरणाक्षमेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ १२ ॥

श्रीमन्तकोटिद्युतिभूषणेभ्यो
द्वाविंशदुल्लासदशातिगेभ्यः ।
अद्वैततत्त्वामृतभाजनेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ १३ ॥

षट्त्रिंशतालक्षणभूषितेभ्यः
प्रोत्कृष्णपद्माकरलोचनेभ्यः ।
प्रतप्तचामीकर विग्रहेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ ४ ॥

संवोध संसारसुसंस्थितेभ्यः
संसारनिर्वाणनिदर्शकेभ्यः ।
महाकृपावेष्टितमानसेभ्यो
नमो नमः शांभविशांवेभ्यः ॥ १५ ॥

परैकविज्ञानरसाकुलेभ्यो
वामाश्रिताचारभयानकेभ्यो ।
स्वातन्त्र्यविध्वस्तजगत्त्रयेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ १६ ॥

श्मशानचर्याप्तमहाफलेभ्यो
मोहान्धकाराय हृदिक्षमेभ्यः ।
परस्पराज्ञापरिपालकेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ १७ ॥

विधूतकेशालिभयानकेभ्यः
सुराशवारक्त विलोचनेभ्यः ।
नवीनकान्तारतितत्परेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ १८ ॥
विभूतिलिप्तांगदिगम्बरेभ्य-
श्चिताग्निधूमालिभयानकेभ्यः ।
स्वाधीनतान्यकृतनिर्जनेभ्यः
नमो नमः शांभविशांभवेभ्यः ॥ १९ ॥
प्रशान्तशास्त्रार्थविचारकेभ्यो
निवृत्तनानारसकाव्यकेभ्यः ।
निरस्तनिः शेषविकल्पनेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ २० ॥
स्वात्मैकभावान्तरिताशयेभ्य-
स्सायुज्यसाम्राज्यसुखाकरेभ्यः ।
श्रीसच्चिदानन्दितविग्रहेभ्यो
नमो नमः शाभविशांभवेभ्यः ॥ २१ ॥
पराप्रसादास्पदमानसेभ्यो
ब्रह्माद्वयज्ञानरसाकुलेभ्यः ।
शिवोहमित्याश्रितचेतनेभ्यो
नमो नमः शांभविशांभवेभ्यः ॥ २२ ॥
सर्वार्थसर्वदा सर्वं सर्वं घटपटादिमत् ।
जगज्जनितविस्तारं ब्रह्माहमिति वेद्म्यहम् ॥ २३ ॥
अहमेव परो हंसः शिवः परमकारणम् ।
मत्प्रसादात्मकं विश्वं स्वात्मालीनरसे गतः ॥ २४ ॥

सच्चिदानन्दनिलयं शिवः परमकारणम् ।
शिवाद्वय प्रकाशाढ्यं श्यामलं धाम धीमहि ॥ २५ ॥
अनेन वीरस्तव कीर्त्तनेन समुद्धृतक्लेशशवासनोहम् ।
संसारकान्तारमहार्णवेऽस्मिन् निमज्जमानं जगदुद्धरेयम् ॥ २६ ॥

इति वीरवन्दनम् ॥

ततः वीरैः सह पुष्पाञ्जलिमादाय स्वस्वासनादुत्थित्वा

विद्याविकल्परहिते विमले विशुद्धे
वीणाविनोदिनि विलासिनि विश्वमातः ॥
विन्ध्याद्रिवासिनि विलोक्य मां विनीतं
कारुण्यपूर्णनयने करुणां कुरुष्व ॥

इत्युच्चरन् स्वेष्ट देवोपरि पुष्पाञ्जलिं दद्यात् ॥ सर्वमङ्गल-माङ्गल्येति मन्त्रेण प्रणमेत् ॥ पुनः पूर्वोक्तां पुष्पाञ्जलिं गृहीत्वा

त्वं कार्तिकी कौतुक मूर्तिराद्या, मयूरपृष्ठेऽर्पित पादपद्मा ॥
चन्द्रानना चारुचकोरनेत्रा, किं स्तौमि मातस्तव पादपद्मम् ॥

इत्युच्चरन शक्तौ परिपुष्पाञ्जलिं दत्वा ॥ देवीप्रपन्नार्त्तिहरेति मन्त्रेण प्रणमेत् ॥ पुनः स्वासने स्थित्वा ॥ ततः कारणात्मगुरुपात्रं गुरवे दद्यात् ॥ गुरोरभावे तत्पात्रं जले क्षिप्त्वा सुरेश्वरि ॥ ततः शक्तिपात्रं शुद्धिसहितं मनुनाऽनेन शक्तौ दत्वा ॥ मन्त्रं यथा ॥

गृह्ण देवि महाभागे शिवे कालाग्नि रूपिणि ॥
स्वर्णपात्रस्थितं तत्त्वं शुद्धिखण्डमनोहरम् ॥

इति फेत्कारिण्याम् ॥ तथा च कालिकाकुलसंभारे ॥

गृह्ण वत्स मया दत्तं पीत शेषं कुलामृतम् ॥
तव शत्रून् हनिष्यामि सर्वाभीष्टं ददाम्यहम् ॥

इत्युच्चरन् सामयिकेभ्योऽपि ज्येष्ठानुक्रमेण वीरपात्रात्परामृतं

शुद्धिसहितं दद्यात् ॥ ततः सामयिकोऽपि भक्त्या हस्ताभ्यां गृहीत्वा मूलमंत्रं तदुपरिऽष्टधाप्रजप्य

प्रदद्यात् प्रथमे पात्रे पिशितं परमेश्वरि ॥
द्वितीये तु वरारोहे मत्स्यं दद्यात्सुसाधितम् ॥
तृतीये तु महेशानि मुद्रां दद्यात् मनोरमाम् ॥
चतुर्थे परमेशानि मांसैर्मत्स्यैश्च मुद्रया ॥

पञ्चमे तु महेशानि दद्यान्मन्त्री

पूर्वोक्त मन्त्रेणानंद भैरव्यौ गुरुदेवताश्च संतर्प्य ॥ ततः यथेच्छया स्व स्व कल्पोक्तविधिना तत्त्वं शुद्धि कुर्य्यात् ॥ अथ चक्रनायकस्तैः सह पात्रवन्दनमाचरेत् ॥ यथा

श्रीमद्भैरव शेखरप्रविलसच्चन्द्रामृतप्लावितं
क्षेत्राधीश्वरयोगिनीगणमहासिद्धैः समाराधितम् ॥
आनन्दार्णवकं महात्मकमिदं साक्षात्रिखण्डामृतं
वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ॥

इत्याभिवन्द्य वामहस्ते पात्रमुत्तोल्य अन्योन्यवन्दनं कृत्वा गुरुशक्ति साधकेष्वाज्ञां गृह्णीयात् ॥ तेजुषस्वेति ब्रूयुः । ततो मूलाधारान्कुण्डलिनी-मिष्टदेवतामाजिह्वां तां विभाव्य गुरुपादुकां स्मृत्वा ॥ शिवोहमिति विचिन्त्य हस्ताभ्यां पात्रं धृत्वा ॥ मूलान्ते ॥

ॐ आत्मतत्त्वाय स्थूलदेहं शोधयामि स्वाहा ॥

इत्युच्चरन् कुण्डलिनीमुखे तर्प्पयेत् ॥ तदुक्तं रुद्रयाकर पद्धत्यां ॥

कृत्वा मन्त्रतनुं स्मरेद्गुरुपदं देवीं कला चिन्मयीम् ॥
पश्चात्पात्रवरं करैरवधृतं दीपैर्युतं कज्जलम् ॥
पुष्पादिष्वभिमन्त्रितं च निविडं सम्बोधकं चासवम् ॥
ये ये चैष पिबन्ति यान्ति खलु ते भुक्तिं च भुक्ति पराम् ॥

तन्त्रान्तरे च ।

सिन्दूरतिलकं भाले पाणौ च तीर्थमुत्तमम् ॥
कृत्वा पिबेद् गुरु ध्यायन् तथा देवीं च चिन्मयीम् ॥
इति ॥

ततः पात्राधारोपरि संस्थाप्य पुनस्तेन क्रमेण परामृतं गृहीत्वा ॥ पात्रवन्दनं कुर्य्यात् ॥

हैमं सिन्धुरसावहं दयितया दत्तं च पेयादिभिः
किञ्चिच्चञ्चलरक्तपङ्कजदृशा सानन्दमुद्वीक्षितम् ।
वामे स्वादु विशुद्धशुद्धिकवलं पाणौ निधायात्मिके
वन्दे पात्रमहं द्वितीयमधुनानन्दैकसम्वर्द्धनम् ॥

तत्पूर्ववत्पात्रं स्वीकृत्यान्यपात्रवंदनं कुर्य्यात् ॥ यथा ॥

इदं पवित्रममृतं पिबामि भवभेषजम् ।
पशुपाशसमुच्छेदकारणं भैरवोदितम् ॥ ७ ॥

विद्यातत्त्वं शोधयामि स्वाहा ॥ २ ॥

ॐ सर्वाम्नायकलाकलापकलितं कौतूहलं द्योतितम्
चन्द्रोपेन्द्रमहेन्द्रशम्भुवरुणब्रह्मादिभिः सेवितम् ।
ध्यातं देवगणैः परं मुनिगणैर्मोक्षार्थिभिः सर्वदा ।
वन्दे पात्रमहं तृतीयमधुना स्वात्मावबोधक्षमम् ॥

इदं पवित्र ॥ शिवतत्त्वं शोधयामि स्वाहा ॥ ३ ॥

मद्यं मीनरसावहं हरिहरब्रह्मादिभिः पूरितं
मुद्रामैथुनधर्मकर्मनिरतं क्षाराम्लतिक्ताश्रयम् ।
आचार्याष्टकसिद्धिभैरवकलान्यासेन चाछादितं
पायन्पंचमकारतत्त्वसहितं पात्रं चतुर्थं नमः ॥

इदं पवित्र ॥ प्रकृतितत्त्वं शोधयामि स्वाहा ॥ ४ ॥

ॐ आधारे भुजगाधिराजवलयं पात्रं महीमण्डलं
हव्यं सप्त समुद्रवारिपिशितं चाष्टौ च दिग्दंतिनः ।

सोहं भैरवमर्चयन् प्रतिदिनं तारागणै रक्षितै-
रादित्यप्रमुखैः सुरासुरगणै. राज्ञाकरैः किंकरैः ।।
प्रथमे तु गुरुध्यानं द्वितीये मंत्रचिन्तनं ।
प्राणायामं तृतीये तु चतुर्थे जपमाचरेत् ।।
पंचमे पंचमं कुर्यादित्युक्तं पंचमपात्राधिकारिणां

इदं पवित्र ।। पुरुषतत्त्वं शोधयामि स्वाहा ।। ५ ।।

छत्रं चामरभद्रपीठपरमानन्दोदयं दायकं
वाजीदंतमनोहरं सुखकरं सायुज्यसाम्राज्यदम् ।
नानाव्याधिभवान्धकारहरणं जन्मान्तरध्वंसनम्
श्रीमद्भैरवभैरवीप्रियतरं पात्रं च षष्ठं नमः ।।

इदं पवित्र ।। मनस्तत्त्वं शोधयामि स्वाहा ।। ६ ।।

जागृत्स्वप्नसुषुप्तिबोधपवनं चैतन्यसाक्षिप्रदं
विद्युद्भास्करवह्निचन्द्रधनुषं ज्योतिःकलाव्यापितम् ।
वामा पिंगलमध्यगात्रवलयं सत्कुण्डलीचोर्ध्वगं
पात्रं सप्तमपूरणेन तरुणानन्दप्रदं पातु माम् ।।

इदं पवित्र ।। ॐ बुद्धितत्त्वं शोधयामि स्वाहा ।। ७ ।।

खड्गं पादुकमञ्जुलं सतिलकं कण्ठे हि सारस्वतं
शत्रोर्वर्गबलशौर्यकार्यहरणं देहस्थिते कारणम् ।।
वांछासिद्धिकरं मनःस्थितिकरं वश्यजगद्योषिता
पात्रं चाष्टममष्टसिद्धिकरणं प्रौढप्रसन्नं भजे ।।

इदं पवित्र ।। ॐ अहंकारतत्त्वं शोधयामि स्वाहा ।। ८ ।।

सर्वानन्दकरं सदा शिवपदं सर्वार्थसम्पत्प्रदं
साम्राज्यार्थकरं समस्तसुखदं चाज्ञानविध्वंसनम् ।
आयुःकान्तियशोविवर्द्धनकरं संसारमोहक्षिदं
पात्रं लक्षणगुणात्मकं च नवमं प्रौढप्रतापं भजे ।।

इदं पवित्र ।। ॐ शक्तितत्त्वं शोधयामि स्वाहा ।। ९ ।।

ब्रह्माविष्णुमहेशानां देवानां च विशेषतः ।
दुर्लभं पावनं पात्रं दशमं प्रणमाम्यहम् ॥

इदं पवित्र ॥ ॐ भैरवतत्त्वं शोधयामि स्वाहा ॥ १० ।

पापघ्नं शान्तिशुभदं दिव्यं स्वादुसुखालयम् ।
पात्रमेकादशं वन्दे गुरुसेवासुखागतम् ॥

इदं पवित्र ॥ ॐ सर्वतत्त्वं शोधयामि स्वाहा ॥ ११ ॥

आश्रमस्थोऽपि योगस्थो तीर्थसेवापरोऽपि वा ।
स्मरणं कारणं मुक्ति नमामि द्वादशं परम् ॥ १२ ॥
धर्माधर्मविहीनस्थं आत्मनः समधर्मसु ।
सुषुम्नापर्य्यमानोऽपि निक्षमोक्षव्रतोद्वहो ॥ १३ ॥
करे पात्रं मुखे स्तोत्रं स्मरेदानन्दभैरवम् ।
मूर्द्ध्नि श्रीगुरुपात्रं तु स्मरणं कीर्तनं परम् ॥ १४ ॥
करे पात्रं मुखे स्तोत्रमानन्दो हृदयाम्बुजे ।
अभिन्नं च पिबेद् हव्यं भुक्तिमुक्तिप्रदायकम् ॥ १५ ॥
दिव्याप्रभा दिव्यवपुर्विनीतो
नाना कलामात्रमयप्रवीणः ॥
महाबलीवीरमिव प्रसन्ना
पात्रप्रतं सप्तदशप्रवीणः ॥ १६ ॥

इत्यादि पात्रानन्तरं पूर्णपात्रं स्वीकारं कुर्य्यात् ॥
तदुक्तं श्रीविद्यार्णवे ॥ यथा ॥

पूर्णाश्रीभुवनेश्वरी भगवती श्रीराजराजेश्वरी ।
पूर्णाभैरवभैरवी च वटुकं पूर्णा सदा कालिका ॥
पूर्णा श्रीवगला च धूम्रवदना श्रीछिन्नमस्तांबिका ।
पूर्णाश्रीगुरुपादुकामृतरसं श्रीपूर्णपात्रं भजे ॥

ततः सामान्यार्घ्योदकेन स्वस्वपात्राणि छालयित्वा ॥ गंधपुष्पाक्षतैर्दक्षिणाभिरापूर्य्य मनुनाऽनेन गुरवे दद्यात् ॥ यथा ॥

देवनाथ गुरो स्वामिन् देशिक स्वात्मनायक ।
त्रायस्व मां कृपासिन्धो पात्रं पूर्णतमं कुरु ॥

ततः पूर्वोक्तक्रमेण वीरैः सह पुष्पाञ्जलिमादाय स्वेष्टदेवे शक्तौ च निःक्षिपेत् ॥ ततः शान्तिस्तोत्रं पठेत् तदुक्तं डामरे यथा ॥

पीत्वाम्नायजनैः सार्द्धं शान्तिस्तोत्रं ततः पठेत् ।
नश्यन्तु प्रेतकूष्माण्डा नश्यन्तु दुःखकातराः ॥
साधकानां शिवाः सन्तु आम्नायपरिपालनाम् ॥ १ ॥
जयन्तु मातरः सर्वाः जयन्तु योगिनीगणाः ।
जयन्तु सिद्धडाकिन्यो जयन्तु गुरुपङ्क्तयः ॥ २ ॥
जयन्तु साधकाः सर्वे विशुद्धाः कौलिकाश्रये ।
समयाचारसम्पन्ना जयन्तु पूजका नराः ॥ ३ ॥
नन्दन्तु अणिमासिद्धाः नन्दन्तु कुलपालकाः ।
नन्दन्तु देवताः सिद्धा सिद्धविद्याधरादयः ॥ ४ ॥
ये चाम्नायविशुद्धाश्च मन्त्रिणः शुद्धबुद्धयः ।
सर्वदानन्दहृदया नन्दन्तु मम भक्तितः ॥ ५ ॥
नक्षत्राणि ग्रहायोगाः करणाश्च तथा परे ।
सर्वे ते सुखिनो यान्तु मासाश्च तिथयस्तथा ॥ ६ ॥
तृप्यन्तु पितरः सर्वे ऋतवो वत्सरादयः ।
भूचराः खेचराश्चैव तृप्यन्तु मम भक्तितः ॥ ७ ॥
अन्तरिक्षचरा ये च ये चान्ये देवयोनयः ।
सर्वे ते सुखिनो यान्तु सर्वानद्याश्च पक्षिणः ॥ ८ ॥
पशवस्तुरगश्चैव पर्वताः कन्दरा गुहाः ।
ऋषयो ब्राह्मणाः सर्वे शान्ति कुर्वन्तु मे सदा ॥ ९ ॥
तीर्थानि पशवो गावो ये चान्ये पुण्यभूमयः ।
वृद्धाः पतिव्रता नार्य्याः शान्ति कुर्वन्तु मे सदा ॥ १० ॥
शिवं सर्वत्र मे चास्तु पुत्रदारधनादिषु ।
राजानः सुखिनः सन्तु क्षेत्रमार्गेऽस्तु मे सदा ॥ ११ ॥

शुभा मे विदिता सन्तु मित्रा स्तृप्यन्तु मे सदा ।
साधका याजिनः सन्तु शिवास्तु पितृपूजकाः ॥ १२ ॥

ये ये पापधिया सुदुषणरता मन्निन्दकाः पूजने ।
वेदाचारविमर्दनष्टहृदया भ्रष्टाश्च ये साधकाः ॥
दृष्ट्वा चक्रमपूर्वमर्चनविधौ ये कौलिका दूषका-
स्ते ते यान्तु विनाशमत्र समये श्रीभैरवस्याज्ञया ॥ १३ ॥

साधकानां च द्वेष्टारः सदैवाम्नायदूषकाः ।
डाकिनीनां मुखे यान्तु तृप्तास्तु पिशितैस्तु ताः ॥ १४ ॥

शत्रवो नाशमायान्तु मम निन्दाकराश्च ये ।
द्वेष्टारः साधकानां च ते नश्यन्तु शिवाज्ञया ॥ १५ ॥

ये निन्दकास्ते प्रलयं प्रयान्तु ये साधकास्ते प्रभवन्तु सिद्धाः ।
सर्वत्र देवी करुणावलोक्या पुरा पुरेशी मम सन्निधत्ताम् ॥१६॥

॥ इति शान्तिस्तोत्रम् ॥

ततो यथाविधि शिवशक्त्या संयोगं कृत्वा ॥ देवीपदे स्वात्मानं समर्प्य ॥ श्रीपात्रमुत्तोल्य देव्युपरि त्रिधा भ्रामयित्वा ॥ मूलमुच्चरन् ॥ अमुकदेवतायै सांगायै सपरिवारायै सायुधायै स वाहनायै सशक्तिकायै अर्घं स्वाहा ॥ इत्यर्घं दत्वा ॥ पुनः पात्रं संस्थाप्य संहारमुद्रया देवीं स्वहृदि समानीय अनेन मनुना ॥ यथा ॥

गच्छ गच्छ परं देवि स्वस्थानं परमेश्वरि ।
यत्र ब्रह्मादयो देवाः सुरा तिष्ठन्ति मे हृदि ॥

इति ॥

ततो ईशान्यां त्रिकोणवृत्तचतुरस्रं मण्डलं कृत्वा निर्माल्येन ॥ निर्माल्यवासिन्यै नमः ॥ इति गंधादिभिः मण्डले संपूज्य ॥ अथ कौलिकानां नियमवचनानि ॥

देवताग्रे तु संभोगो देवता प्रीणनं भवेत् ।
संभोगं तु परं कृत्वा देवीं हृदि समानयेत् ।।

इति कुमारीकल्पे ।।

एकासने निविष्टा ये भुञ्जीताश्चैकभाजने ।
एकपात्रे पिबेद् द्रव्यं ते यान्ति नरकाऽधमे ।।

इति कुलार्णववचनादेकपात्रं न कर्तव्यम् ।। एकपात्रेति सर्वैर्मिलित्वा एकपात्रे न पिबेत् तु प्रतिवारंद्रव्यपाने भिन्नभिन्नपात्राणि कार्यम् ।। कुलप्रदीपे च ।।

विना मन्त्रेण या पूजा विना मांसेन तर्पणम् ।
शक्त्या विना तु यत्पानं तत्सर्वं निःफलं भवेत् ।।
स्वशक्तिं वीरशक्तिं वा दीक्षितां कुलमग्रणीम् ।
पाययित्वा पिबेद्भद्रे इति शास्त्रस्त्र निर्णयः ।।

तथा च निर्वाणतन्त्रेऽपि ।।

अलिकुम्भसहस्राणि पिशितं भारशतैरपि ।
न तृप्यन्ति महेशानि भगलिङ्गामृतं विना ।।
आद्या मुद्रा विना वत्स सकला निःफलाक्रिया ।

इति सांख्यायनतन्त्रे ।। कौलिकागमेऽपि ।।

पिशितं तिलमात्रं तु तिलार्द्धमलिबिन्दुकम् ।
सकृत्तर्पणमात्रेण कोटियज्ञफलं भवेत् ।।
यावदासवगन्धः स्यात्पशुः पशुपतिप्रिये ।।
विना लिगांसगन्धेन साक्षात्पशुपतिः पशुः ।

इत्याम्नायवचनात् ।। अन्यतत्त्वाभावेपि ।। आद्यस्यैवाधिकारः तत्रैव च ।।

पानं तु त्रिविधं प्रोक्तं दिव्यवीरपशुक्रमैः ।
दिव्यं देव्याग्रतो पानं वीरं वीरासनस्थितम् ।।
तृतीयं तु पशोः पानं कृच्छोकमोहकृत् ।

उदयाकरपद्धत्या च ।।

असंस्कृतं पशोः पानं संस्कृतं भैरवः स्वयम् ।
चक्रपूजाविधौ शस्तं सर्वसिद्धिकरं परम् ॥
असंस्कृतं पशोः पानं कलहोद्वेगकारकम् ।
संस्कृतं सिद्धिजनकं कायाचित्तादिशोधनम् ॥
मन्त्राणां स्फुरणं तेन महापातकनाशनम् ।
आयुः श्रीकान्तिसौभाग्यं ज्ञानसंस्कृतपानतः ॥
अष्टैश्वर्यं खेचरत्वं पतनं विधिवर्जनम् ।

तथा च हालाहलतन्त्रे ॥

न पदाभ्यां स्पृशेत्पात्रं न बिन्दुं पातयेदधः ।
नैकहस्तेन दातव्य न मुद्रावर्जितं पुनः ॥
नार्चयेदेकहस्तेन न पिबेदेकपाणिना ।
अन्योन्यं वन्दनं कृत्वा पिबेत्तदमृतं पुनः ॥
सव्येनोद्धृत्य पात्रं तु ... ...
विना संगेन योगेन न कुर्य्याच्छून्यसंगतिः ।
साधारं नोद्धरेत्पात्रं आधारेषु विनिःक्षिपेत् ॥
पात्रं न चालयेत्स्थानान्न कुर्य्यात्पत्रसंकरम् ।
सशब्दं न पिबेद्द्रव्यं तथैव न च पूरयेत् ॥
न स्थूलं न च सूक्ष्मं च पात्रं कुर्य्यान्मनोहरम् ।
उच्छिष्टो न स्पृशेच्चक्रं कुलद्रव्याणि सुन्दरि ॥
बहिः प्रक्षाल्य च करौ कुलद्रव्याणि दापयेत् ।
निष्ठीवनमधोवायुं चक्रमध्ये न कारयेत् ॥
चक्रमध्ये घटे भग्ने पात्रे च पतिते भुवि ।
दीपनाशे च शान्त्यर्थं श्रीचक्रं कारयेत्सुधीः ॥
स्वपात्रस्थितहेतुं च न दद्याद् भैरवाय च ।
दत्ते च सिद्धिहानिः स्यात्क्रुद्धा भवति योगिनी ॥
परिहासं प्रलापं च वितन्त्रा बहु भाषणम् ।
औदासीन्यं भयं क्रोधं चक्रमध्ये विवर्जयेत् ॥

अन्योऽयं ताडयेत्पात्रं न पात्रं चालयेदधः ।
गुरुशक्तिसुतानां च गुरुज्येष्ठकनिष्ठयोः ॥
उच्छिष्टं भक्षयेत्स्त्रीणां ताभ्यो नोच्छिष्टमर्पयेत् ।
चक्रमध्ये तु नियतं नान्यथा पतनं भवेत् ॥
कनिष्ठानां स्वशिष्याणां दद्यादुच्छिष्टमेव च ।
दद्यात्स्नेहेन यो मर्त्यः स भवेदापदां पदम् ॥

अन्यत्रापि ॥

शक्त्युच्छिष्टं पिबेद्द्रव्यं वीरोच्छिष्टं च चर्वणम् ।
शक्तिवीरप्रसादेन किं न सिद्धयति भूतले ॥
गुरुमुखा स्वपुत्री च तथा च मन्त्रपुत्रिका ।
एतासां रमणं वर्जं ब्रह्माद्य मानसे न च ॥
कौलिकस्य च या पत्नी सा साक्षादीशिवे ।
तासां रमणमात्रेण कौलिको नारकी भवेत् ॥
माता च गौरवात्पूज्या अन्या या विहिता स्त्रियः ।
इति यागे च कर्तव्यो विचारो मन्त्रवित्तमैः ॥
अन्यथा न विचारेण देवी शापः प्रजायते ।
शिवहीना च या शक्तिः दूरतां परिवर्जयेत् ॥
अभिषेकाद्भवेच्छुद्धिर्मन्त्रस्योच्चारणाच्छु तौ ।
प्रपंचमेन देवेशि सर्वपापैः प्रमुच्यते ॥
केवले नाथयोगेन साधको भैरवो भवेत् ।
द्वितीयेन महेशानि पूजको ब्रह्मरूपभाक् ॥
केवलेन तृतीयेन महाभैरवतां व्रजेत् ।
चतुर्थेन तु तत्त्वेन भुवि पूज्यैकनायकः ॥
परे च रमतां यान्ति मम तुल्यं परमेश्वरी ।
पंचमेन भवेद्योगी सर्वसिद्धिपरायणः ॥
इतीदं कथितं देवि स गोप्यमति यत्नतः ।
न देयं पशवं देवि कुलनिन्दापराय च ॥

कुलार्णवे कुलादीनां गृहं गत्वा विशुद्धये ।
याचयेदमृतं ज्ञानं तदभावे जलं पिबेत् ॥
अन्तः शाक्ता बहिः शैवा सभायां वैष्णवा मता ।
नानारूपधरा कौला विचरन्ति महीतले ॥

लिंगागमे च ॥

गुरुणा लोकिता शिष्यः उत्तिष्ठेदासनं त्यजेत् ।
गुरुणा यदशक्तापि यदुक्तं तत्र लंघयेत् ॥
रभसं मैथुन मिथ्या यो वदेद्गुरु मंदिरे ।
स याति नरकं घोरं भैरवेणेत्ति भाषितम् ॥
संक्रान्तिर्नवमी पूर्णा चाष्टमी च चतुर्दशी ।
एकादश्या व्यतीपाते कर्मलोपं न कारयेत् ॥
तत्त्वहीनं कृतं कर्म जपकर्म च निःफलम् ।
शाम्भवी कुप्यते तस्य ब्रह्महत्या दिने दिने ॥

भावचूडामणौ ॥

एकपात्रे पिबेद्द्रव्यं वीरो माहेश्वरो यदि ।
स्वानोच्छिष्टं भवेत्पात्रं प्रायश्चित्ती सकौलिकः ॥
गायत्रीभिः सहस्रेण उपवासत्रयेण च ।
सम्यक् शोधितचित्तैस्तु सुवर्णं गुरवे दहेत् ॥
चक्रं कृत्वा देवेशि पूजयेत्तर्पणं विना ।
चत्वारि तस्य नश्यन्ति आयुर्विद्या यशोबलम् ॥
अभिषेके विना भूते आचार्यत्वं करोति यः ।
योनि कोटिशतं याति रौरवं नरकं व्रजेत् ॥
मातृरूपं परित्यज्य स्त्रीरूपं शक्ति भावदेत् ।
स याति नरकं घोरं जन्म कोटिशतानि च ॥
परां लक्षत्रयं जप्त्वा अजपालक्षमेव च ।
सूर्यबीजं पंच लक्षं ततः शुद्धिमवाप्नुयात् ॥

कुलपूजान्तरायं तु यः करोति सुदुर्मतिः ।
स याति नरकं घोरं विंशत्येक निजं कुलम् ।।

इति कौलिकानां नियमानि ।।
अथ पंचचक्र विधिः ।। तदुक्तं कुलार्णवे ।।

श्री देव्युवाच—

देव देव जगन्नाथ सर्व विद्याविशारद ।
कौलिकानां हितार्थाय चक्रभेदं वद प्रभो ।।

ईश्वर उवाच—

चक्रं पंचविधं प्रोक्तं तत्सर्वं शृणु पार्वति ।
विधिना पूजयेच्चक्रं सुखमोक्षफलाप्तये ।।
राजचक्रं महाचक्रं देवचक्रं तथा परम् ।
वीरचक्रं चतुर्थं तु स्यात्पशु चक्रं च पंचमम् ।।
पूजाद्रव्यं राजचक्रं वदामि शृणु पार्वति ।
चातुर्वर्णकुमार्यास्तु स्वरूपाः सुमनोहराः ।।
तदभावे अन्येपि सुमनोहराः ।
तदभावे कुमारी च चर्मकी विधिनार्चयेत् ।।
यवनी योगिनी चैव रजकी स्वपची तथा ।
कैवर्त्तक समुत्पन्ना पञ्चशक्तिरुदाहृताः ।।
एका प्रशस्ता सकला साधके नयन योजिताः ।
कृतमन्त्राऽभिषेकास्तु सर्वकामफलप्रदाः ।।
मधु मद्यं च सं प्रोक्तं शुद्धिः छाग समुद्भवा ।
मत्स्यं वोदालकं प्रोक्तं मुद्रा गोधूमजा स्मृता ।।
पुष्पं च-चन्दनं चैव राजचक्रे नियोजयेत् ।
एकादश्यां भानु नौमी संक्रांतौ च विशेषतः ।।

धर्मार्थंकाममोक्षार्थे राजचक्रं विधीयते ।
कृत्वा च चक्रं प्रद्याद्वै गुरवे दक्षिणां शुभाम् ।।
साधकेभ्यो यथाशक्त्या यथा कालोचितं शुभम् ।
षष्ठिवर्षसहस्राणि देवलोके महीयते ।।

इति राज चक्रम् ।।

ईश्वर उवाच—

महाचक्रं प्रवक्ष्यामि भक्त्या तें शृणु पार्वति ।
माता च भगिनी चैव दुहिता च स्नुषा तथा ।।
गुरुपत्नी च पंचैता शक्तयो यामले स्मृताः ।

पार्वती उवाच—

समागत्य पशुर्देव क्रीडते नयने न च ।
तत्र देवस्य वचनं कुत्र तिष्ठति शङ्कर ।।

ईश्वर उवाच—

दीक्षितस्य गुरोः पत्नी या माता गर्भधारिणी ।
यस्या विवाहिता कन्या तर्प्पयेन्न तु भोगयेत् ।।
भगिनी दुहिता चैव वीरभार्या स्नुषा तथा ।
वर्जनीयां प्रयत्नेन तथान्यांश्चैव भोगयेत् ।।
द्रव्यं च गौडितं प्रोक्तं शुद्धिः कुक्कुटसम्भवा ।
मत्स्यास्तु रोहिता प्रोक्ता मुद्रा भाव भवा तथा ।।
करवीर संभवं पुष्पं चंदनं रक्तचंदनम् ।
दक्षिणां विधिना देवि आचार्य्याय निवेदयेत् ।।
षष्ठिवर्षसहस्राणि ब्रह्मणा सह मोदते ।
गुरुवारे तथा शुक्रे चतुर्थ्यां सप्तमी दिने ।।
महाचक्रं महादेवि. सर्वकामार्थ सिद्धिदम् ।

इति महा चक्रम् ।।

ईश्वर उवाच—

देवचक्रं प्रवक्ष्यामि यत्सुरैः क्रियते सदा ।
शक्तयस्तत्र वक्ष्यामि देविरत्या मनोरमा ॥
राजवेश्या नागरी च गुह्यवेश्या तथाप्रिये ।
देववेश्या नर्तकी या ब्रह्मवेश्या च तीर्थगा ॥
नागरी कस्यचित्कन्या रंडाकामरताकुला ।
पंचैता शक्तयो देवि देवचक्रे नियोजिता ॥

मत्स्यं तुरग संप्रोक्तं शुद्धिवाराहमेव च ।
मद्यं कादम्बरी प्रोक्तं चंदनं रक्तचंदनम् ॥
एवमेवान्नजा प्रोक्ता मुद्राश्चरण संभवा ।
पुष्पं जाती शवान्ययं यत्किंचिदन्यमुत्तमम् ॥

आचार्य्याय पुरस्कृत्य दक्षिणां विनिवेदयेत् ।
षष्ठिवर्षसहस्राणि देव राजेन मोदते ॥
अष्टम्यां च चतुर्दश्यां नवम्यां कुजसोमयोः ।
शिवे समागते चैव उत्तमं तदुदाहृतम् ॥

इति देवचक्रम् ॥

ईश्वर उवाच—

वीरचक्रं प्रवक्ष्यामि येन सिद्धयन्ति साधकाः ।
अनया पूजया देवि देहि सिद्धिः प्रजायते ॥
शक्तयो मत्स्यमुद्राश्च च प्रशस्तं यन्निवेदयेत् ।
भूचराणां खेचराणां तत्तन्मासं तु साधितम् ॥
मुद्रा सर्वाभिधान्यानि उक्तानि परमेश्वरि ।
पुष्पाणि श्वेपीतानि रक्तानि च विशेषतः ॥
वीराद्विश्वचातुः पंचा षडाष्टनवकं तथा ।
कल्पयेद्वीर पंक्तिं चा पद्य देव चा सुंदरि ॥

करेभ्यो दक्षिणां दद्यादाचार्य्याय विशेषतः ।
असंख्यं पातकं चैव ब्रह्महत्यादि पातकम् ।।
नाशयेत्तत्क्षणाद्देवि वीरचक्र प्रसादतः ।
दक्षिणा विधिहीनं च तच्चक्रं निःफलंभवेत् ।।

इति वीरचक्रम् ।।

ईश्वर उवाच—

पशुचक्रं प्रवक्ष्यामि अधमं तदुदाहृतम् ।
यस्मिन् योगेन स्वादेन हीनतां याति शैलजे ।।
एकाकी मद्यपानेन एकाकी शक्तिक प्रिये ।
माहेश्वरस्य संसर्गं कुरुते न कदाचन ।।
मद्यं मांसं तथा मत्स्य मात्मसौख्यस्य कारणात् ।
आयुःक्षयश्च दारिद्रं मृतः पैशाचतां व्रजेत् ।।
पैशाचचक्रे तिष्ठेत षष्ठिवर्षसहस्रकम् ।
सश्चिारं नरकं भुक्त्वा सूकरो जायते भुवि ।।

इति पशुचक्रम् ।।

ईश्वर उवाच—

राजचक्रं राज्यदं स्यान्महाचक्रं प्रकाशकृत् ।
वीरचक्रं सिद्धिदं स्याद्देवचक्रं समृद्धिदम् ।।
पशुचक्राच्च दारिद्रमायुर्हानिश्च जायते ।
कपटे दक्षिणाहीनं सर्वचक्रं वृथा भवेत् ।।
या काचित्तिष्ठती चक्रे माता च भगिनी स्नुषा ।
दुहिता च तथा भार्या सर्वं माहेश्वरेऽर्पयेत् ।।
माहेश्वरो यदा भुंक्ते भुक्ते स्याद्वेदवाक्यतः ।
तस्य संसर्गमात्रेण विवर्ण पदवी परा ।।

गौडी पौष्टी तथा माध्वी द्राक्षीवृक्षसमुद्भवा ।
अनेन राजचाक्रस्य वारुणी पंचाधा स्मृता ।।
छागकुक्कुटवाराहशशना मृग संभवा ।
तव चाक्रार्चने देवि विशुद्धि पंचविधा स्मृता ।।
गोधूममुद्गमाषाश्च तंडुलाश्चाणकस्तथा ।
पूजने तव देवेशि मुदा पंचविधा स्मृता ।।
रजकी चार्मकारी चा वेश्या चैव रजस्वला ।
मातंगी मधुमत्ता चा अर्चने शक्तयस्मृताः ।।
वेश्यागृहं प्रयागः स्याद्रजक्याः पुस्करस्तथा ।
चर्मकारी भवेत्काशी सर्वतीर्थरजस्वला ।।
यत्किंचित्संगमं तीर्थं विद्या ते भुविमंडले ।
तानि सर्वाणि तिष्ठन्ति मातंगी संगमे सकृत् ।।
नैवेद्यं पुरतो देवि दृष्ट्वा रश्मी कृतं मया ।
रसान् भक्तस्य जिह्वाग्रे हृत्स्यामि शैलजे प्रिये ।।
बीरान् भैरवरुपिणस्तदवला श्रीभैरवीरूपिणी ।
नामं नाममुदारपादयुगलं श्रीमद्गुरूणां तथा ।।
देवंमानस पंकजे विमलया शक्तया समालिंगितं
ध्यायं ध्यायमहं नमामि विमलंचाक्रे स चाक्रेश्वरं ।।

इति मौदगलीय गोत्रस्य श्री स्वामिसदानन्दनाथस्य
संकलितं 'त्रिपुरसुन्दरी पूजारत्नं" समाप्तम् ।।

परदेवी सूक्त

श्रीगणेशायनमः ॐ नमोमहालक्ष्म्यैनमः अस्य श्रीपरदेवीसूक्तमालामन्त्रस्य ॥ मार्कण्डेयमेधसौऋषिगायत्र्यादीनि नानाविधानिछन्दांसि त्रिशक्तिरूपिणीचण्डिकादेवता ऐं वीजं ह्रीं शक्ति क्लींकीलकं ममचिन्तितमनोरथसिध्यर्थेजपेबिनियोगः इतिसंकल्प्य ॐ मार्कण्डेयमेधभ्यामृषिभ्यां नमः शिरसि गायत्र्यादिनानाविधेभ्यः छन्दोभ्योनमः मुखे त्रिशक्तिरूपिण्यै चण्डिकायै देवतायै नमो हृदये एं बीजाय नमः गुह्ये ह्रींशक्तयेनमः पादयोः क्लीं कीलकाय नमः नाभौ मम चिन्तितकामनासिद्ध्यर्थें जपे विनियोगाय नमः सर्वाङ्गे इति। ऐं हृदयायनमः ह्रीं शिरसे स्वाहा क्लीं शिखायैवषट ऐं कवचाय हुं ह्रीं नेत्रत्रयायवौषट क्लीं अस्त्रायफट् एवं करन्यासः अथध्यानं योगाद्यामरकार्य निर्गतमहत्तोजः समुत्पत्तिनीभास्वत्पूर्ण शशांक चारुवदना नीलोल्लसद्भूलता गौरोत्तुंगकुचद्वयात्तदुपरिस्फूर्ज्जत्प्रभामंडला बंधू कारुणकाय-कान्तिरवताछ्रीचण्डिकासर्वतः। १ ॥

इतिध्यात्वा मनसासंपूज्यपरदेवीसूक्तंजपेत् तद्यथा ॐ ऐं ह्रीं क्लीं ह्स्क्फ्रें ह्सौं सौं जय जय महालक्ष्मी जगदाद्य बीजेसुरासुर त्रिभुवननिदाने दयांकुरे सर्वदेवतेजोरूपिणि महामहामहिमे महामहारूपिणि महामहामायेमहामायास्वरूपिणिविरञ्चि संसक्तेनिधिवरदे चिदानन्देविष्णुदेहावृते महामाहिनिमधुकैटभजिघांसिनिनित्यवरदानतत्परेमहासुधाब्धिवासिनि महामहातेजोधारिणिसर्वाधारेसर्वकारण कारणे अचिन्त्य रूपे ईन्द्रादिनिखिल निर्जर सेवितेसामगानगायिनिपूर्णोदयकारिणि विजये जयन्ति अपराजिते सर्व सुन्दरि रक्तां शुके सूर्यकोटि संकाशे चन्द्रकोटि सुशीतले अग्निकोटिदहनशीलेयमकोटिक्रूरे वायुकोटिवहनसुशीतले ॐकारनादविरूपिणि निगमागममार्गदायिनिमहिषासुरनिर्दलिनिधूम्रलोचनवध-

परायणे चण्डमुण्डादिशिरच्छेदिनिरक्तबीजादिरुधिरशोषिणिरक्तपानप्रिये महायोगिनिभूतवेतालभैरवादि तुष्टिविधायिनि निशुंभशुंभशिरच्छेदिनिनिखिलासुर बलखादिनि त्रिदश राज्यदायिनि सर्वस्त्रीरत्नरूपिणि दिव्यदेहेनिर्गुणे सगुणे सदसद्रूपधारिणि सुरवरदेभक्तत्राण-तत्परे वरे वरदे सहस्राक्षरे अयुताक्षरे सप्तकोटि चामुण्डारूपिणि नवकोटि कात्यायिनिरूपे अनेकशक्त्यालक्ष्यालक्ष्य स्वरूपे इन्द्राणि ब्रह्माणि रुद्राणि ईशानिभीमे भ्रामरि नारसिंहित्रयस्त्रिंशत्कोटि दैवतेअनन्तकोटि ब्रह्माण्ड नायके चतुरशीतिलक्षमुनिजनसंसवते सप्तकोटि मंत्रस्वरूपेमहाकालरात्रिप्रकाशे कला काष्ठादिरूपिणि चतुर्दशभुवनाविर्भावकारिणिगरुड़गामिनि क्रौंकार ह्रौंकार ह्रींकार श्रींकार क्लौंकार जूंकार सौंकार ऐंकार क्लींकार ह्लींकार ह्लांकार हौंकार नाना बीज कुटनिर्मितशरीरे नाना बीजमंत्र राजविराजिते सकल सुंदरिगण सेवितचरणारविंदेश्रीमहात्रिपुरसुंदरिकामेशदयिते करुणारसकल्लोलिनिकल्प वृक्षाधः शिष्ठते चिंतामणिद्वीपावरछितमणिमंदिरनिवासे चापिनि खड्गिनि चक्रिणि गदिनिशंखिनी पद्मिनिनिखिलभैरवाधिपते समस्त योगिनी चक्र परिवृते कालिके कालितारे तोंतले सुतारे ज्वालामुखिछिन्न मस्तके भुवनेश्वरित्रिपुरे लोकजननि विष्णुवक्षस्थलालंकारिणि अजिते अमते अमराधिपे अनौपमचरितेगर्भवासादिदुःखापहारिणिमुक्तिक्षेत्राधिष्ठायिनिशिवेशांतिकुमारि देवीसूक्तदशशताक्षरे चण्डि चामुण्डेमहाकाली महालक्ष्मी महासरस्वती त्रयिविग्रहे प्रसीद प्रसीद सर्वमनोरथान् पूरय पूरय सर्वारिष्टविघ्नान्छेदयछेदय सर्वग्रहपीडाज्वरोग्रभयं विध्वंसयविध्वंसय सर्वत्रिभुवन जीवजातं वशमानय वशमानय मोक्षमार्गंदर्शयदर्शय ज्ञानमार्गंप्रकाशयप्रकाशय अज्ञानतमो नाशय नाशय धनधान्यादि वृद्धिकुरुकुरु सर्वकल्याणा निकल्पय कल्पय मां रक्षय रक्षय सर्वापद्भ्यो निस्तारय निस्तारय ममवज्रशरीरं साधय साधय ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चेस्वाहा ॐ नमस्ते नमस्ते नमस्ते स्वाहा १००० परदेव्या इदं सूक्तं यः पठेत्पर्यतो नरः सर्वसिद्धिमवाप्नोति सर्वत्र विजयीभवेत् ॥ संग्रामेषु जयेच्छत्रून्मा-

तंगमिवकेसरी ॥ वशयेन्निखिलान्लोकान्विशेषणमहीपतीन् ॥ त्रिकालं यः पठेन्नित्यं देव्याः सूक्तमिदंपरं ॥ तस्य विघ्नाः प्रलीयंते महापीडाश्चदारुणाः ॥ ज्वरादिरोगशमनं परकृत्यानिवारणं ॥ पराभिचारशमनं तीव्र दारिद्र्यवारणं ॥ सर्वकल्याणनिलयं देव्याः संतोषकारकं ॥ सहस्रावृत्तितोदेवीमनोरथसमृद्धिधा ॥ द्विसहस्रावृत्ति जपात्सर्वकष्टनाशनं ॥ त्रिसहस्रावृत्तितरक्तवशरुद्रा जयोषितां ॥ शतत्रयं जपेद्यरक्त वर्षत्रय मतंद्रितः ॥ पश्येत्सचंडिकां साक्षाद्वरदानकृतोद्यमं ॥ इदं रहस्यं परमं गोपनीय प्रयत्नतः ॥ न वाच्यं कस्यचिद्देवीविधानमिवसुंदरी ॥ इति श्रीडामरतंत्रेपार्वतीश्वरसंवादेपरदेवीसूक्तंसंपूर्ण ॥ ६ ॥

चक्रेश्वरी स्तोत्र

श्री गणेशाय नमः ॥ श्री चक्रे चक्रभीमे ललितवरभुजे लीलयां दोलयन्ती चक्रं विद्युत्प्रकाशं ज्वलित शतमखं खे खगेन्द्राधिरूढे ॥ त्वत्वं रुद्भूतभावे सकल गुणनिधे त्वं महामन्त्रमूर्तिः क्रोधादित्य प्रतापे त्रिभुवनमहिते पाहि मां देवि चक्रे ॥ १ ॥

क्लीं क्लीं क्लीं कारचित्ते किल किल वदने दुन्दुभी भीमनादे ह्रां ह्रीं ह्रूं सख्य बीजे खग पति गमने मोहिनी सोविणी त्वं ॥ त्वं चक्रं चक्र देवोभ्रमति जगदिदं चक्र विक्रान्ति कीर्तिः विघ्नौघं विद्ययंती विजय जयकरी पाहि मां देवि चक्रे ॥ २ ॥

श्रीं श्रीं श्रूं श्रः प्रसिद्धे जणित जनमणः प्रीति सन्तोष लक्ष्मीः श्रीवृद्धि कीर्तिकान्तिम् प्रथयसि वरदे त्वं महामन्त्र मूर्तिः त्रैलोक्य क्षोभयन्तो मुशलभि दुरहंकार भीमैक नादे क्लीं क्लीं क्लीं द्रावयन्ती द्रुत कनकनिभे पाहि मां देवि चक्रे ॥ ३ ॥

वज्र क्रोधे सुभीमे शशिधर धवले भ्रामयन्ती सुचक्रम् रौं रौं रौं हः कराले भगवंति वरदे रुद्र नेत्रे सुकान्ते आं इं ॐ भाषयन्ती त्रिभुवनम-

खिलं तत्व तेजः प्रकाशे क्षां क्षां क्षूँ क्षोभयन्तीं विषय विषयुते पाहि मां देविचक्रे ॥ ४ ॥

ह्लां ह्लीं ह्लूं ह्लः सहर्षे ह ह ह ह हंसिते चक्र संकासबीजे ह्लीं ह्लां ह्लः क्षीर वर्णे कुवलयनयने विद्र संद्रावयन्ती ह्लीं ह्लों ह्लौं क्षः विलोम मृतत जइजया वारुणैः प्लावयन्ती क्षीं क्षीं क्षीं सत्वबीजे प्रलय विषयुते पाहि मां देवि चक्रे ॥ ५ ॥

आं आं आं ह्लीं युगान्ते प्रलय दिन करा काल कोटि प्रतापे चक्राणि भ्रामयन्ती ललित वरभुजे पद्ममेकं फलं च ॥ सच्चक्रे कुं कुमांगे विधृत निग्वहेतीक्ष रुद्र प्रचण्डे ह्लीं ह्लीं हुंकार कारी रर रर रमणे पाहि मां देवि चक्रे ॥ ६ ॥

श्रां श्रां श्रूं श्रः सुवृत्ते त्रिभुवन महिते नाद विन्दु त्रिनेत्रे बं बं बं वज्र हस्ते ल ल ल ल ललिते नील शोनील कोशे ॥ चं चं चं चक्र धारे चल चल चलिते नुपुरा लोड लोडे त्वं लक्ष्मीः श्रीः सुकीर्तिः सुर वर वनिते पाहि मां देवि चक्रे ॥ ७ ॥

ह्लां ह्लीं हूङ्कार मध्ये किलकिल मिथुने तुष्ट वश्याधिकारे ह्लां ह्लूं ह्लः जप्रघोपे प्रलय युग पटा तेज शब्द प्रणादे ॥ वां वां वां क्रोधमूर्तिः ज्वल ज्वल ज्वलिते ज्वाल संज्वाल लीले ॥ आं ईं ऊँ अः प्रघोपप्रकटित दशने पाहि मां देवि चक्रे ॥ ८ ॥

यः स्तोत्रं मन्त्र रूपं पठति निजमनो भक्ति पूर्वं शृणोति त्रैलोक्यं तस्य वश्यं भवति बुध जने वाक् पटुत्वं च दिव्यं ॥ सौभाग्यं स्त्रीपुमध्ये खग पति गमने गौरवत्वत्प्रसादा डाकिन्यो गुह्यको वाविद धति नभयं चक्र देव्या स्तवेन ॥ ९ ॥

इति श्री रुद्रयामले चक्रेश्वरीस्तोत्रं सम्पूर्णम् शुभं भूयात् ॥ मंगलम् ददाति ॥ श्री देव्यै नमः ॥

चतुर्थ्यन्त खड्गमाला मन्त्र

अस्य श्रीखड्गमालामन्त्रस्य उपस्थाधिष्ठायिने वरुणादित्यऋषये नमः शिरसि, गायत्रीच्छन्दसे नमः मुखे, ललितादेवतायै नमः हृदये, क ५ बीजाय नमः गुह्ये, ह ६ शक्तये नमः पादयोः, स ४ कीलकाय नमः नाभौ, श्रीललिताप्रसादसिद्ध्यर्थे पाठे विनियोगः। कूटत्रयद्विरावृत्या करहृदयादिन्यासः।

ध्यानम्

बालार्कारुणतेजसां त्रिनयनां रक्ताम्बरोल्लासिनीं
नानालङ्कृतिराजमानवपुषं बालोडुराड्शेखराम्
हस्तैरिक्षुधनुःसृणीसुमशरां पाशं मुदं बिभ्रतीं
श्रीचक्रस्थितसुन्दरीं त्रिजगतामाधारभूतां स्मरेत् ॥

इति ध्यात्वा मानसैः सम्पूज्य।

ॐ ऐं ह्रीं श्रीं-
ॐ नमः त्रिपुरसुन्दर्यै नमः
० ,, हृदयदेव्यै नमः
० ,, शिरोदेव्यै नमः
० ,, शिखादेव्यै नमः
० ,, कवचदेव्यै नमः
० ,, नेत्रदेव्यै नमः
० ,, अस्त्रदेव्यै नमः
० ,, कामेश्वर्यै नमः
० ,, भगमालिन्यै नमः
० ॐ नित्यक्लिन्नायै नमः
० ,, भेरुण्डायै नमः
० ,, वह्निवासिन्यै नमः
० ,, महावज्रेश्वर्यै नमः
० ,, शिवदूत्यै नमः
० ,, त्वरितायै नमः
० ,, कुलसुन्दर्यै नमः
० ,, नित्यायै नमः
० ,, नीलपताकायै नमः

० ॐ नमः विजयायै नमः
० ,, सर्वमङ्गलायै नमः
० ,, ज्वालामालिन्यै नमः
० ,, चित्रायै नमः
० ,, महानित्यायै नमः
० ,, परमेश्वरपरमेश्वर्यै नमः
० ,, मित्रीशमय्यै नमः
० ,, षष्ठीशमय्यै नमः
० ,, उड्डीशमय्यै नमः
० ,, चर्यानाथमय्यै नमः
० ,, लोपामुद्रामय्यै नमः
० ,, अगस्त्यमय्यै नमः
० ,, कालतापनमय्यै नमः
० ,, धर्माचार्यमय्यै नमः
० ,, मुक्तकेशीश्वरमय्यै नमः
० ,, दीपकलानाथमय्यै नमः
० ,, विष्णुदेवमय्यै नमः
० ,, प्रभाकरदेवमय्यै नमः
० ,, नमः तेजोदेवमय्यैं नमः
० ,, मनोजदेवमय्यै नमः
० ,, कल्याणदेवमय्यै नमः
० ,, रत्नदेवमय्यै नमः
० ,, वासुदेवमय्यै नमः

० ॐ श्रीरामानन्दमय्यै नमः
० ,, अणिमासिद्ध्यै नमः
० ,, लघिमासिद्ध्यै नमः
० ,, महिमासिद्ध्यै नमः
० ,, ईशित्वसिद्ध्यै नमः
० ,, वशित्वसिद्ध्यै नमः
० ,, प्राकाम्यसिद्ध्यै नमः
० ,, भुक्तिसिद्ध्यै वमः
० ,, इच्छासिद्ध्यै नमः
० ,, प्राप्तिसिद्ध्यै नमः
० ,, सर्वकामसिद्ध्यै नमः
० , ब्राह्म्यै नमः
० ,, माहेश्वर्यै नमः
० ,, कौमार्यै नमः
० ,, वैष्णव्यै नमः
० ,, वाराह्यै नमः
० ,, माहेन्द्र्यै नमः
० , चामुण्डायै नमः
० ,, महालक्ष्म्यै नमः
० ,, सर्वसंक्षोभिण्यै नमः
० ,, सर्वविद्राविण्यै नमः
० ,, सर्वाकर्षिण्यै नमः
० ,, सर्ववशङ्कर्यै नमः

० ॐ सर्वोन्मादिन्यै नमः
० ,, सर्वमहांकुशायै नमः
० ,, सर्वखेचर्यै नमः
० ,, सर्वबीजायै नमः
० ,, सर्वयोन्यै नमः
० ,, नमः सर्वत्रिखण्डायै नमः
० ,, त्रैलोक्यमोहन-
चक्रस्वामिन्यै नमः
० ,, प्रकटयोगिन्यै नमः
० ,, कामाकर्षिण्यै नमः
० , बुद्ध्याकर्षिण्यै नमः
० ,, अहङ्काराकर्षिण्यै नमः
० ,, शब्दाकर्षिण्यै नमः
० ,, स्पर्शाकर्षिण्यै नमः
० ,, रूपाकर्षिण्यै नमः
० ,, रसाकर्षिण्यै नमः
० ,, गन्धाकर्षिण्यै नमः
० ,, चित्ताकर्षिण्यै नमः
० ,, धैर्याकर्षिण्यै नमः
० ,, स्मृत्याकर्षिण्यै नमः
० ,, नामाकर्षिण्यै नमः
० ,, बीजाकर्षिण्यै नमः
० ,, आत्माकर्षिण्यै नमः
० ॐ अमृताकर्षिण्यै नमः
० ,, शरीरकर्षिण्यै नमः
० ,, सर्वाशापरिपूरकचक्र-
स्वामिन्यै नमः
० ,, गुप्तयोगिन्यै नमः
० ,, अनङ्गकुसुमायै नमः
० ,, अनङ्गमेखलायै नमः
० ,, अनङ्गमदनायै नमः
० ,, अनङ्गमदनातुरायै नमः
० ,, अनङ्गरेखायै नमः
० ,, अनङ्गवेगिन्यै नमः
० ,, अनङ्गांकुशायै नमः
० ,, अनङ्मालिन्यै नमः
० ,, सर्वसंक्षोभणचक्र-
स्वामिन्यै नमः
० ,, नमः गुप्ततरयोगिन्यै नमः
० ,, सर्वसंक्षोभिण्यै नमः
० ,, सर्वविद्राविण्यै नमः
० ,, सर्वाकर्षिण्यै नमः
० ,, सर्वाह्लादिन्यै नमः
० ,, सर्वसम्मोहिन्यै नमः
० ,, सर्वस्तम्भिन्यै नमः
० ,, सर्वजृम्भिण्यै नमः

० ॐ सर्ववशङ्कर्यै नमः
० ,, सर्वरञ्जिन्यै नमः
० ,, सर्वोन्मादिन्यै नमः
० ,, सर्वार्थसाधिन्यै नमः
० ,, सर्वसम्पत्तिपूरण्यै नमः
० ,, सर्वमन्त्रमय्यै नमः
० ,, सर्वद्वन्द्वक्षयङ्कर्यै नमः
० ,, सर्वसौभाग्यदायकचक्र-
स्वामिन्यै नमः
० ,, सम्प्रदाययोगिन्यै नमः
० ,, सर्वसिद्धिप्रदायै नमः
० ,, सर्वसम्पत्प्रदायै नमः
० ,, सर्वप्रियङ्कर्यै नमः
० ,, सर्वमङ्गलकारिण्यै नमः
० ,, सर्वकामप्रदायै नमः
० ,, सर्वदुःखविमोचिन्यै नमः
० ,, सर्वमृत्युप्रशमिन्यै नमः
० ,, सर्वविघ्ननिवारिण्यै नमः
० ,, सर्वाङ्गसुन्दर्यै नमः
० ,, सर्वसौभाग्यदायिन्यै नमः
० ,, सर्वार्थसाधकचक्र-
स्वामिन्यै नमः
० ,, कुलोत्तीर्णयोगिन्यै नमः

० ॐ सर्वज्ञायै नमः
० ,, सर्वशक्त्यै नमः
० ,, सर्वैश्वर्यप्रदायै नमः
० ,, सर्वज्ञानमय्यै नमः
० ,, सर्वव्याधिविनाशिन्यै नमः
० ,, सर्वाधारस्वरूपायै नमः
० ,, सर्वपापहरायै नमः
० ,, सर्वानन्दमय्यै नमः
० ,, सर्वरक्षास्वरूपिण्यै नमः
० ,, सर्वेप्सितप्रदायै नमः
० ,, सर्वरक्षाकरचक्र-
स्वामिन्यै नमः
० ,, निगर्भयोगिन्यै नमः
० ,, वशिन्यै नमः
० ,, कामेश्वर्यै नमः
० ,, मोदिन्यै नमः
० ,, विमलायै नमः
० ,, अरुणायै नमः
० ,, जयिन्यै नमः
० ,, सर्वेश्वर्यै नमः
० ,, कौलिन्यै नमः
० ,, सर्वरोगहरचक्र-
स्वामिन्यै नमः

० ॐ रहस्ययोगिन्यै नमः
० ,, वाणिन्यै नमः
० ,, चापिन्यै नमः
० , पाशिन्यै नम
० ,, अंकुशिन्यै नमः
० ,, महाकामेश्वर्यै नमः
० ,, महावज्रेश्वर्यै नमः
० ,, महाभगमालिन्यै नमः
० ,, महाश्रीसुन्दर्यै नमः
० ,, नमः सर्वसिद्धिप्रदचक्र-
स्वामिन्यै नमः
० ,, परापररहस्य-
योगिन्यै नमः
० ,, त्रिपुरायै नमः
० ,, त्रिपुरेश्यै नमः
० ,, त्रिपुरसुन्दर्यै नमः
० ,, त्रिपुरवासिन्यै नमः
० ॐ त्रिपुराश्रियै नमः
० ,, त्रिपुरमालिन्यै नमः
० ,, त्रिपुरसिद्धायै नमः
० ,, त्रिपुराम्बमहात्रिपुर-
सुन्दर्यै नमः
० ,, नमः महामहेश्वर्यै नमः
० ,, महामहाराज्ञ्यै नमः
० ,, महामहाशक्त्यै नमः
० ,, महामहागुप्तायै नमः
० ,, महामहाज्ञप्तायै नमः
० ,, महामहानन्दायै नमः
० ,, महामहास्पन्दायै नमः
० ,, महामहाशयायै नमः
० ,, महामहाश्रीचक्रनगर-
साम्राज्यै नमस्ते नमस्ते
नमस्ते स्वाहा श्रीं ह्रीं ऐं ॐ
श्रीपरदेवतार्पणमस्तु ।

इति चतुर्थ्यन्तखड्गमालामन्त्रः ।

नया संसार प्रेस
वाराणसी